Bill No.3/07-08

158.

2008-0323

पञ्चसायक: by कविशेखर
श्री ज्योतिश्वराचार्य – Edited with
variants by वैद्य जादवजी त्रिकमजी
आचार्य.
Mumbai, 1981 Vikram era.

1346

6

14

Indira Gandhi National
Centre for the Arts

( नितान्तं गोपनीयम् । )

कविशेखरश्रीज्योतिरीशेन विरचितः

# पञ्चसायकः ।

आयुर्वेदीयग्रन्थमालासंपादकेन

वैद्य जादवजी त्रिकमजी आचार्य

इत्यनेन संशोधितः ।

Indira Gandhi National
Centre for the Arts

मुम्बय्यां

'मणिलाल इच्छाराम देसाई' इत्यनेन स्वीये

'गुजराती न्यूस' मुद्रणयन्त्रालये मुद्रितः ।

कोट बेक-हाउस लेन ।

वि. सं. १९८१

1346

SANS
612.6
JYO

DATA ENTERED
Date 27/06/08

Indira Gandhi National
Centre for the Arts

KALANIDHI
Rare Book Collection
ACC No.: R-323
IGNCA Date: 25-3-08

# निवेदनम्—

पञ्चसायकनामायं ग्रन्थः कविशेखरेति पदवीमलङ्कुर्वता श्रीज्योतिरीशेन विरचित इति तेनैव ग्रन्थारम्भे लिखितादात्मवृत्तात् प्रतीयते । सोऽयं कविशेखरः कस्मिन् देशे कस्मिन् समये च समजनीति निर्णेतुं न किञ्चिदपि साधनमुपलभ्यते । ग्रन्थेऽस्मिन् कामशास्त्रप्रतिपाद्याः प्रायः सर्वेऽपि विषया संक्षेपेण सरलतया स्पष्टतया च प्रतिपादिताः सन्ति । ग्रन्थस्यास्य संशोधनार्थमादर्शपुस्तकत्रयमुपलब्धम् । तत्र प्रथमं क. संज्ञितं द्वितीयं ख. संज्ञितं च पुण्यपत्तनस्थभाण्डारकरसंस्थापितप्राच्यान्वेषणसंस्थासंग्रहालयात् प्राप्तं, तृतीयं ग. संज्ञितं स्वर्गवासिनां विद्वद्वर्याणां नागरसर्वस्वकुट्टनीमतयोर्व्याख्याप्रणेतॄणां तनसुखराम मनसुखराम त्रिपाठी इत्येषां संग्रहालयाल्लब्धम् । एवं पुस्तकत्रयसहायेन ग्रन्थस्यास्य संशोधने यथामति कृतो यत्नः । तथाऽपि भ्रमप्रमादादिवशाज्जातं स्खलनं क्वाप्युपलभ्येत चेत्सुधीभिः संशोधनीयमिति

यादवशर्मणः ।

# पञ्चसायकस्य विषयानुक्रमणिका ।

## प्रथमः सायकः ।


| विषयाः | पृ० | श्लो० |
|---|---|---|
| मङ्गलाचरणं .... .... .... | १ | १ |
| ग्रन्थकर्तुरात्मपरिचयप्रदर्शनम् .... .... | ,, | २—३ |
| नायकलक्षणम् .... .... .... | १—२ | ४ |
| पीठमर्दलक्षणम् .... .... .... | २ | ५ |
| पद्मिनीलक्षणम् .... .... .... | ,, | ६ |
| चित्रिणीलक्षणम् .... .... .... | ,, | ७ |
| शङ्खिनीलक्षणम् ... .... .... | ,, | ८ |
| हस्तिनीलक्षणम् .... .... .... | ३ | ९ |
| पद्मिन्यादीनां रतौ सुखकरास्तिथयः .... | ,, | १० |
| चन्द्रकलानिरूपणम् .... .... .... | ,, | ११-१२ |
| चन्द्रकलाप्रदीपनविधिः ... .... | ३—४ | १३-१४ |
| पद्मिन्याश्चन्द्रकलाप्रबोधनविधिः .... .... | ४ | १५-१८ |
| चित्रिणीचन्द्रकलाप्रबोधनविधिः .... .... | ४—५ | १९-२२ |
| शङ्खिनीचन्द्रकलाप्रबोधनविधिः .... ... | ५ | २३-२५ |
| हस्तिन्याश्चन्द्रकलाप्रबोधनविधिः ... .... | ५—६ | २६-२७ |
| पद्मिन्यादीनां रतिकालनिरूपणम् .... .... | ६ | २८-२९ |
| देवसत्त्वाया लक्षणम् .... .... .... | ,, | ३० |
| गन्धर्वसत्त्वाया ,, .... .... .... | ,, | ३१ |
| यक्षसत्त्वाया ,, .... .... .... | ६—७ | ३२ |
| प्रेतसत्त्वाया ,, .... .... ... | ७ | ३३ |


## द्वितीयः सायकः ।


| | | |
|---|---|---|
| लिङ्गस्यायामेन योन्याः परिणाहेन च स्त्रीपुरुषयोर्भेदाः | ७ | १ |
| त्रिविधसमरतनिरूपणम् .... .... | ,, | २ |

| विषयाः | | | | पृ० | श्लो० |
|---|---|---|---|---|---|
| द्विविधमुच्चरतम् | .... | ... | .... | ७ | ३ |
| द्विविधं नीचरतम् | .... | .... | .... | ,, | ,, |
| एकमत्युच्चरतं | .... | .... | .... | ,, | ४ |
| एकमतिनीचरतं | .... | .... | .... | ,, | ,, |
| विषमरतेषु प्रीत्यभावे हेतुः | | .... | .... | ,, | ,, |
| प्रोक्तरतानामुत्तममध्यमाधमत्वं | | .... | .... | ८ | ५ |
| प्रोक्तरतेषु स्त्रीपुरुषयोः प्रीतौ विशेषः | | | .... | ,, | ६ |
| वेगभेदात्सुरतभेदाः | .... | .... | .... | ,, | ७ |
| शशलक्षणम् | .... | .... | .... | ,, | ८ |
| मृगलक्षणम् | .... | .... | .... | ,, | ९ |
| वृषलक्षणम् | .... | .... | .... | ,, | १० |
| अश्वलक्षणम् | ... | .... | .... | ,, | ११ |
| हरिणीलक्षणम् | .... | .... | .... | ९ | १२ |
| अश्वालक्षणम् | .... | .... | .... | ,, | १३ |
| हस्तिनीलक्षणम् | .... | .... | .... | ,, | १४ |
| स्त्रीणां बालादयोऽवस्थाविशेषाः | | .... | | ,, | १५ |
| तासां रञ्जनोपायाः | .... | .... | ... | ,, | १६ |
| शैलाम्भोनिधिपार्श्वदेशजायाः | | स्त्रिया | लक्षणम् | ,, | १७ |
| सौराष्ट्रजायाः कलिङ्गजायाश्च | | ,, | ,, | १० | १८ |
| वङ्गश्रीहट्टकामरूपजायाः | | ,, | ,, | ,, | १९ |
| मध्यदेशजायाः | .... | ,, | ,, | ,, | २० |
| तीरमुक्तदेशजायाः | .... | ,, | ,, | ,, | २१ |
| गौडदेशजायाः | .... | ,, | ,, | ,, | २२ |
| मालवदेशजायाः | .... | ,, | ,, | ,, | २३ |
| चोलदेशजायाः | .... | ,, | ,, | ,, | ,, |
| गुर्जरदेशजायाः | .... | ,, | ,, | ११ | २४ |


Indira Gandhi National Centre for the Arts

| विषयाः | | | पृ० | श्लो० |
|---|---|---|---|---|
| सिन्धुदेशजायाः | स्त्रिया | लक्षणम् | ११ | २५ |
| कोशलदेशजायाः .... | ,, | ,, | ,, | २६ |
| चीनसौवीरद्रविडमलयदेशजायाः | ,, | ,, | ,, | २७ |
| तैलङ्गदेशजायाः .... | ,, | ,, | ,, | २८ |
| पौण्ड्रकाम्बोजदेशजायाः | ,, | ,, | ,, | २९ |
| लाट-कर्णाटदेशजायाः | ,, | ,, | १२ | ३० |
| काश्मीराभीरगान्धारदेशजायाः | ,, | ,, | ,, | ३१ |
| जात्यादिज्ञानप्रयोजनम् | .... | .... | ,, | ३२ |
| योनिभेदाः .... | .... | .... | ,, | ३३–३४ |
| सर्वोपायैः कामिनीनां मनोरञ्जनं कार्यं | | .... | १२–१३ | ३५–३६ |
| प्रीतिभेदनिरूपणं .... | .... | .... | १३ | ३७–३८ |
| स्त्रीणां रागविनाशहेतवः | .... | .... | ,, | ३९ |
| **तृतीयः सायकः।** | | | | |
| शरीरदौर्गन्ध्यहरा योगाः | .... | .... | १३–१४ | १–६ |
| महापरिमलं तैलम् .... | .... | .... | १४ | ७ |
| स्नानीयसुगन्धिनिरूपणं | .... | .... | ,, | ८–९ |
| देहसौगन्ध्यकरा योगाः | .... | .... | १४–१५ | १०–१३ |
| सर्वोत्तमसुगन्धयोगाः .... | .... | .... | १५ | १४–१६ |
| मुखवासयोगाः .... | .... | .... | ,, | १७–१९ |
| वाजीकरणप्रयोजनं .... | .... | .... | ,, | २० |
| वाजीकरा योगाः .... | .... | .... | १६ | २१–२९ |
| योनिगाढीकरणप्रयोजनं | .... | .... | ,, | ३० |
| योनिशैथिल्यहरा योगाः | .... | .... | १६–१७ | ३१–३६ |
| योनिद्रावणप्रयोजनं .... | .... | .... | १७ | ३७ |
| योनिद्रावणयोगाः .... | .... | .... | ,, | ३८–४२ |
| लिङ्गस्थूलीकरणयोगाः | .... | .... | १८ | ४३–४४ |


Indira Gandhi National Centre for the Arts

| विषयाः | पृ० | श्लो० |
|---|---|---|
| ध्वजदृढीकरणयोगः .... .... ... | ,, | ४५ |
| वीर्यस्तम्भनकरा योगाः .... .... | ,, | ४६–४९ |
| वशीकरणं तिलकं .... .... .... | ,, | ५० |
| ,, अञ्जनं .... ... .... | १८–१९ | ५१ |
| ,, चूर्णं .... .... .... | १९ | ५२ |
| ,, अनुलेपनं ... .... ... | १९–२० | ५३–५७ |
| वशीकरणः धूपः .... .... .... | २० | ५८ |
| ,, मदनमन्त्रः .... ... .... | ,, | ५९–६१ |
| ,, चामुण्डामन्त्रः .... .... | २०–२१ | ६२–६३ |
| ,, विश्वेश्वरीमन्त्रः .... .... | २१ | ६४–६५ |
| पद्मिनीवशीकरणमन्त्रः .... ... | ,, | |
| चित्रिणीवशीकरणमन्त्रः .... .... | २२ | |
| शङ्खिनीवशीकरणमन्त्रः .... .... | ,, | |
| हस्तिनीवशीकरणमन्त्रः .... .... | ,, | |
| अनिच्छाहरणोपायः .... .... | ,, | ६६ |
| स्तनोत्थापनयोगाः .... .... .... | २२–२३ | ६७–७० |
| योनिसुगन्धिकरा योगाः .... .... | २३ | ७१–७२ |
| रोमशातनयोगाः .... .... ... | ,, | ७३–७५ |
| पुष्पजननयोगः .... .... .... | ,, | ७६ |
| गर्भधारणोपायाः .... .... .... | ,, | ७७–७९ |
| गर्भसंस्थापका योगाः .... .... .... | २३–२४ | ८० |
| सुखप्रसवकरमन्त्राः .... .... .... | २४ | ८१–८४ |
| वन्ध्याकरा योगाः .... .... .... | ,, | ८५–८७ |
| केशसंस्कारनिरूपणं ... .... .... | ,, | ८८–८९ |
| इन्द्रलुप्तहरो योगः .... .... .... | २५ | ९० |


Indira Gandhi National Centre for the Arts

| विषयाः | पृ० | श्लो० |
|---|---|---|
| **चतुर्थः सायकः।** | | |
| कन्यायाः सुलक्षणानि .... .... | २५ | १—३ |
| ,, दुर्लक्षणानि .... .... | २५-२६ | ४—६ |
| वरस्य शुभलक्षणानि ... .... .... | २६ | ७ |
| ,, अशुभलक्षणानि ... .... | ,, | ८ |
| विवाहभेदाः, तेषां लक्षणानि च .... .... | २६-२७ | ९-१६ |
| परदारवर्जनोपदेशः .... .... .... | २७-२८ | १७-१८ |
| कामस्य दशावस्थाः .... .... .... | २८ | १९ |
| हेतुवशात्परदारागमनेऽदोषः .... .... | ,, | २०-२१ |
| दौत्ये योग्याः स्त्रियः ... .... .... | ,, | २२ |
| सुखसाध्या योषितः .... .... .... | २८-२९ | २३ |
| कष्टसाध्या ,, .... .... .... | २९ | २४ |
| सुरते त्याज्या योषितः .... ... | ,, | २५ |
| ,, त्याज्यस्थानसमयनिरूपणम् .... | ,, | २६-२७ |
| ,, योग्यं स्थानं .... .... .... | ,, | २८ |
| नारीणां सुरताभिलाषलक्षणानि .... .... | ३० | २९-३० |
| आलिङ्गनविधिः .... .... .... | ,, | ३१ |
| आलिङ्गनभेदाः .... .... .... | ,, | ३२ |
| वृक्षाधिरूढं .... .... .... | ,, | ३३ |
| लतावेष्टितकं .... .... .... | ,, | ३४ |
| जाघनं .... .... .... | ,, | ३५ |
| विद्धकं .... .... .... | ३०-३१ | ३६ |
| ऊरूपगूढं .... .... .... | ३१ | ३७ |
| तिलतण्डुलं .... .... .... | ,, | ३८ |
| क्षीरजलं .... .... .... | ,, | ३९ |
| ललाटिकं .... .... .... | ,, | ४० |

*

| विषयाः | पृ० | श्लो० |
|---|---|---|
| चुम्बनस्थानानि .... .... .... | ३१ | ४१–४२ |
| चुम्बनानि | | |
| निमितकं .... .... .... | ,, | ४३ |
| स्फुरितं .... .... .... | ,, | ४४ |
| घृष्टं .... .... .... | ,, | ४५ |
| पीडितं .... .... .... | ,, | ४६ |
| संपुटं .... .... .... | ,, | ४७ |
| समौष्ठं .... ... .... | ,, | ४८ |
| नखदानस्थानानि .... .... .... | ३२ | ४९ |
| नखाघातभेदाः | | |
| छुरितं .... .... .... | ,, | ५० |
| अर्धेन्दुः ... .... .... | ,, | ५१ |
| मण्डलं .... .... .... | ,, | ५२ |
| शशकप्लुतं .... .... .... | ,, | ५३ |
| मयूरपादं .... ... .... | ,, | ५४–५५ |
| पङ्कजपत्रं .... .... ... | ,, | ५५ |
| संस्मारकं दर्दुरकं .... .... .... | ,, | ५६ |
| नखक्षतप्रशंसा .... .... .... | ,, | ५७–५८ |
| दशनविधिः .... ... .... | ३२–३३ | ५९–६० |
| दशनभेदाः | | |
| विद्रुम. .... .... .... | ३३ | ६१ |
| खण्डाभ्रकं .... .... .... | ,, | ६२ |
| कोलचर्वः .... .... .... | ,, | ६३ |
| केशाकर्षणभेदाः | | |
| समहस्तकं .... .... .... | ,, | ६४ |
| तरङ्गरङ्गः .... .... .... | ,, | ,, |


Indira Gandhi National Centre for the Arts

| विषयाः | | | | पृ० | श्लो० |
|---|---|---|---|---|---|
| कामावतंसः | .... | ... | .... | ३३ | ६५ |
| भुजङ्गवल्ली | .... | .... | .... | ,, | ६६ |
| केशाकर्षणसमयः | .... | .... | .... | ,, | ६७–६८ |

## पञ्चमः सायकः ।

| | | | | | |
|---|---|---|---|---|---|
| योनिमुखस्थास्तिस्रो नाड्यः | | .... | .... | ,, | १ |
| समीरणा | .... | .... | .... | ३४ | २ |
| चान्द्रमसी | .... | .... | .... | ,, | ३ |
| गौरी | .... | .... | .... | ,, | ४ |
| बन्धप्रयोगविधिः | .... | .... | .... | ,, | ५—६ |
| उत्तानबन्धाः | | | | | |
| अतिदुर्लभः | .... | .... | .... | ,, | ७ |
| समपादः | .... | .... | .... | ,, | ८ |
| नागरः | .... | .... | .... | ,, | ९ |
| व्योमपदः | .... | .... | .... | ,, | १० |
| त्रैविक्रमः | .... | .... | .... | ,, | ११ |
| चाटुककेलिकः | .... | .... | .... | ३४–३५ | १२ |
| अवदारितः | .... | .... | .... | ३५ | १३ |
| पार्श्वबन्धाः | | | | | |
| उपवीतिकः | .... | .... | .... | ,, | १४ |
| संपुटः | .... | .... | .... | ,, | १५ |
| नागबन्धः | .... | .... | .... | ,, | १६ |
| उपविष्टबन्धाः | | | | | |
| पद्मासनं | .... | .... | .... | ,, | १७ |
| कीर्तिबन्धः | .... | .... | .... | ,, | १८ |
| अधोमुखबन्धाः | .... | .... | .... | ,, | १९–२० |


Indira Gandhi National Centre for the Arts

| विषयाः | | | | पृ० | श्लो० |
|---|---|---|---|---|---|
| ऊर्ध्वबन्धाः | | | | | |
| व्यात्तकरः | .... | .... | .... | ३५ | २१ |
| त्रिपादबन्धः | ... | .... | .... | ३६ | २२ |
| पुरुषायितबन्धाः | .... | .... | .... | ,, | २३–२४ |
| विपरीतरतेऽयोग्या नारी | | ... | ... | ,, | २५ |
| संताडनविधिः | .... | .... | .... | ,, | २६ |
| संताडनभेदाः | | | | | |
| संताडितं | .... | .... | ... | ,, | २७ |
| पताकम् | .... | ... | .... | ,, | ,, |
| कुण्डलं | .... | .... | .... | ,, | २८ |
| बिन्दुमालः | .... | .... | .... | ,, | ,, |
| सीत्कृतं | .... | .... | .... | ,, | २९ |
| स्तनितं .... | .... | .... | .... | ,, | ३०–३१ |
| अष्टनायिकाः | | | | | |
| स्वाधीनपतिका | ... | .... | .... | ३७ | ३२ |
| उत्कण्ठिता | .... | .... | .... | ,, | ३३ |
| वासकसज्जिता | .... | .... | .... | ,, | ३४ |
| कलहान्तरिता | .... | .... | .... | ,, | ३५ |
| विप्रलब्धा | .... | .... | .... | ,, | ३६ |
| खण्डिता | .... | .... | .... | ३७–३८ | ३७ |
| अभिसारिका | .... | .... | .... | ३८ | ३८ |
| प्रोषितपतिका | .... | .... | .... | ,, | ३९ |
| ग्रन्थोपसंहारः | .... | .... | .... | ,, | ४० |


Indira Gandhi National
Centre for the Arts

कविशेखरेतिबिरुदवता ज्योतीश्वरेण विरचितः

# पञ्चसायकः ।

## प्रथमः सायकः ।

### मङ्गलाचरणम् ।

रतिपरिमलसिन्धुः कामिनीकेलिबन्धु-
विंहितभुवनमोदः सेव्यमानप्रमोदः ।
जयति मकरकेतुर्मोहनस्यैकहेतु-
र्विरचितबहुसेवः कामिभिः कामदेवः ॥ १ ॥

### ग्रन्थकर्तुरात्मपरिचयप्रदर्शनम् ।

अस्ति प्रत्यहमर्थितापहरणप्रीत्यैकदीक्षागुरुः
श्रीकण्ठार्चनतत्परो भुवि चतुःषष्टेः कलानां निधिः ।
संगीतागमसत्प्रमेयरचनाचातुर्यचिन्तामणिः[1]
प्रख्यातः कविशेखराङ्कितपदः श्रीज्योतिरीशः कृती[2] ॥ २ ॥
दृष्ट्वा मन्मथतन्त्रमीश्वरकृतं वात्स्यायनीयं मतं[3]
गोणीपुत्रकमूलदेवरचितं बाभ्रव्यवाक्यामृतम् ।
श्रीनन्दीश्वररन्तिदेवभणितं[4] क्षेमेन्द्रविद्यागमं
तेनाकल्प्यत पञ्चसायक इति प्रीतिप्रदः कामिनाम् ॥ ३ ॥

### नायकलक्षणम् ।

साचारः करुणामयः कृतमतिर्दाताऽवदाताशयः[5]
काम्यः कामकलानिधिः सुवचनः स्त्रीणां मतः सुन्दरः ।

१ '०चूडामणिः' ख. । २ 'श्रीमानेष महीपतिर्गिरिसुतापादाब्जपूजापरः' क. । ३ '०मतं' क. । ४ '०भणितं' क. । ५ '०वादावदताशयः' क. ।

आढ्यो नीतिपटुः[1] क्षमी च कुतुकी शूरः कुलीनो युवा
संक्षेपादिह नायको निगदितः संगीतशिक्षान्वितः ॥ ४ ॥

पीठमर्दलक्षणम् ।

आचारे विनये नये च सुकृतौ तौर्यत्रि[2]केऽकृत्रिमः
शास्त्रे कौतुकशिल्पनाटकविधौ नानाकलाकौशले ।
ऊहापोहसमस्तनर्मघ[3]टने भावेङ्गितज्ञः पटु-
र्मन्त्र[4]ज्ञः स्थिरसौहृदः सुवचनः स्यात्पीठमर्दः सदा ॥ ५ ॥

पद्मिनीलक्षणम् ।

सम्पूर्णेन्दुमुखी विलोलनयना[5] पीनस्तनी दक्षिणा
मृद्वङ्गी विकचारविन्दसुरभिः श्यामाऽथ गौरद्युतिः ।
अल्पाहाररता विलासकुशला हंसस्वना मा[6]निनी
लज्जालुर्गुरुदेवपूजनरता[7] सा नायिका पद्मिनी ॥ ६ ॥

चित्रिणीलक्षणम् ।

श्यामा पद्ममुखी कुरङ्गनयना क्षामोदरी वत्सला
सङ्गीतागमवेदिनी वरतनुस्तुङ्गस्तनी शिल्पिनी ।
विद्यालापरता मतङ्गजगतिर्माद्यन्मयूरस्वना
विज्ञेया कविशेखरप्रणयिनी चित्र[8]स्वना चित्रिणी ॥ ७ ॥

शङ्खिनीलक्षणम् ।

तन्वङ्गी कुटीलेक्षणा लघुकुचाभोगा म[9]दावेशिनी
प्रायो दीर्घकचा स्वभावपिशुना कष्टोपभोग्या रते ।
पिङ्गा लोलगतिश्च घर्घररवा रक्ताम्बराह्लादिनी
नानास्थाननखप्रदानरसिका सेयं मता शङ्खिनी ॥ ८ ॥

---

१ 'नीतिमतिः' क. । २ 'शौर्ये च तौर्यत्रिके' ग. । तौर्यत्रिके गीतनृत्यवाद्यसमूहे । ३ '०घटनाभावेङ्गितज्ञः' क. । '०घटने भावेङ्गिते यः' ग. । ४ 'मर्मज्ञः' ख. । ५ 'कुरङ्गनयना' ६ 'तद्गतिः' ग. । 'गायिका' क. । ७ '०परा स्यान्नायिका' क. । ८ 'चित्रोपमा' क. ख. । ९ 'मदावेक्षिणी' ख. ।

हस्तिनीलक्षणम् ।

पीनस्वल्पतनुर्भृशं मृदुगतिः क्रूरा नमत्कन्धरा
स्तोकापिङ्गलकुन्तला पृथुकुचा लज्जाविहीनानना ।
बिम्बोष्ठी बहुभोज्यभोजनरुचिः कष्टैकसाध्या रते
गौराङ्गी करिदानगन्धिमदनस्रावा मता हस्तिनी ॥ ९ ॥

पद्मिन्यादीनां रतौ सुखकरास्तिथयः ।

ब्रह्मास्येन्दुशराक्षिसंख्यतिथयः ख्याता नलिन्या रते,
पौलस्त्यास्यरसाष्टभास्करतिथौ प्रीता भवेच्चित्रिणी ।
रुद्रानङ्गतुरङ्गशम्भुतिथिषु स्याच्छङ्खिनी मोदिता,
शेषाः स्युः सुरतोत्सवेषु करिणीजातेः स्त्रियाः प्रीतये॥१०॥

इति जातिसमुद्देशः ।

चन्द्रकलानिरूपणम् ।

अङ्गुष्ठे चरणे नितम्बनिलये जानुद्वये जङ्घयो-
र्नाभौ वक्षसि कक्षयोर्निगदिता कण्ठे कपोलेऽधरे ।
नेत्रे कर्णयुगे ललाटफलके मौलौ च वामभ्रुवा-
मूर्ध्वाधश्चलनक्रमेण कथिता चान्द्री कला पक्षयोः ॥ ११ ॥

सीमन्ते नयनेऽधरे च गलके कक्षातटे चूचुके
नाभौ श्रोणितटे मनोभवगृहे जङ्घातटोरुद्वये ।
गुल्फे पादतले तदङ्गुलितलेऽङ्गुष्ठे च तिष्ठत्यसौ
वृद्धिक्षीणतया समं शशिकला लीलाकरी योषिताम् ॥१२॥

चन्द्रकलायाः प्रदीपनविधिः ।

मौलौ कुन्तलकर्षणं नयनयोराचुम्बनं गण्डयो-
र्दन्तेनाधरपीडनं हृदि हतिर्मुष्ट्या च नाभौ शनैः ।

---

१ स्वल्पतनुः ह्रस्वा । २ 'च गुल्फवलये' ग. । ३ 'बस्तिके' क. ख. बस्तिके जघने । ४ 'तिथितः' क. । ५ 'जङ्घाद्वये जानुनि' ग. 'जङ्घातटे पिण्डके' ख. । ६ 'कामस्तेषु समं शशिकला पक्षद्वयोर्योषिताम्' ख. । 'च सुमहत्स्फोटां' क. ।

कक्षाकण्ठकपोलमण्डलकुचश्रोणीषु देया नखाः
सीमन्ते लिखनं नखैरुरसिजौ गृह्णीत गाढं ततः ॥ १३ ॥
कुर्वीताविरतं मनोभवगृहे मातङ्गलीलायितं
जान्वङ्गुष्ठपदोरुगुल्फकलनं ह्यन्योन्यतः कामिनोः ।[1]
इत्येवं कथितं प्रदेशकलनादिन्दोः कलादीपनं
कर्तव्यं च नरैर्न विस्तरभयादुक्तः प्रपञ्चोऽखिलः ॥ १४ ॥

पद्मिनीचन्द्रकलाप्रदीपनम् ।

गाढालिङ्गनपूर्वकं कररुहैरालिख्य जङ्घास्थलीं[2]
दत्त्वा सूक्ष्मनखान्नितम्बफलके पार्श्वे च पृष्ठोदरे ।
सीत्कारध्वनिजागरूकपुलकामाद्ये दिने पद्मिनी-
मित्थं चन्द्रकलाविदः स्ववशतां कामं नयेयुः स्त्रियम् ॥१५॥
आचुम्ब्याधरपल्लवं स्तनमुखे नेत्रालिके पार्श्वयो-
र्मूर्धान्ते जघनस्थलोरुफलके कृत्वा नखालेखनम् ।
मर्षन्तो नखरैः पदाम्बुजयुगं सम्यक्कुरङ्गीदृशं
संसेव्याविरतं प्रबुद्धमदनां कुर्युर्द्वितीयादिने ॥ १६ ॥
श्लिष्ट्वा गाढतरं निपीड्य च कुचौ पीत्वा च दन्तच्छदं
वामोरौ करजक्षतं भुजलतामूले[3] विशेषात् पुनः ।
मायूराङ्घ्रिकमर्धचन्द्रछुरितप्रायान्नखानादरा-
द्द्युर्बाह्यरतोपचारचतुराः प्रायश्चतुर्थ्यां तिथौ ॥ १७ ॥
बिम्बोष्ठं परिचुम्ब्य दक्षिणकरेणाकृष्य केशोच्चयं
स्वच्छन्देन विमृद्य चूचुकयुगं चुम्बन्प्रियां भावयेत् ।
आमृश्यात्करजैः सखेलपुलकं भूयो नितम्बस्थलीं
पञ्चम्यां द्रवतां नयेत्कमलिनीमित्याह वात्स्यायनः ॥ १८ ॥

चित्रिण्याश्चन्द्रकलाप्रबोधनविधिः ।

चुम्बित्वाऽलि(ल)कमुन्मदः कररुहैरालिख्य वक्षोजकं
श्रोणीपृष्ठभुजाङ्घ्रिकर्णजघनस्थानोरुयुग्मस्थलीम् ।

---

१ 'जङ्घाङ्गुष्ठपदोरुगुल्फहननादन्योन्यतः' ख. । २ 'गण्डस्थलीं' ख. ।
३ 'भुजलतामौलौ' ग. ।

पाणिभ्यामुपगूहयन् स्वरमणीं कान्तो दशम्यां तिथौ
कन्दर्पं प्रतिबोध्य चन्द्रकलया कुर्यान्निजां चित्रिणीम् ॥१९॥
श्लिष्ट्वा कन्धरकन्दलीं भुजलतापाशेन गाढं पुनः
पायं पायमजस्रमुत्पलदृशां वक्त्रारविन्दासवम् ।
नाभीकण्ठनितम्बबिम्बनखरव्यापारपारङ्गमैः
षष्ठ्यां चन्द्रकलाकलापनिपुणैर्देया नखाः सर्वतः ॥ २० ॥
ग्रीवायां परिरभ्य गाढमसकृन्नाभिं नखैरालिखन्
दन्तौष्ठेन[1] निपीडयन्कुचतटीं कण्ठे मनाक् ताडयेत् ।
सानन्दं स्मरमन्दिरे करिकरक्रीडायितं कुर्वता
नेतव्या तरुणी स्वकीयवशतां चण्डीतिथौ चित्रिणी ॥२१॥
आलिङ्ग्य प्रसभं कपोलनयनश्रोणीश्रुतीश्चुम्बय-
न्स्थानेष्वेषु नखप्रदानकुशलो दत्त्वा नखान्निर्दयम् ।
संदश्याधरपल्लवं क्रमवशादाकृष्य[2] केशान् वशे
चित्रां संविदधीत सीत्कृतवतीं भानोस्तिथौ नायकः ॥२२॥

शङ्खिन्याश्चन्द्रकलाप्रदीपनविधिः ।

कक्षामुल्लसितैर्विलिख्य करजैरालिङ्ग्य दोर्भ्यां मुहु-
र्गाढं चोरजिसौ निपीड्य सुतरां विष्णोस्तिथौ चन्द्रवित् ।
आचुम्बेच्च कपोलकण्ठगलकं मृद्नन्नुरोजद्वयं
कन्दर्पस्य तिथौ नखक्षतिवशाद्राक् शङ्खिनीं द्रावयेत् ॥२३॥
व्यादष्टौष्ठपुटः कपोलनयनश्रोत्रं नखैरालिखन्
सान्द्रानन्दनिगूढकण्ठवलयां भानोस्तिथौ भामिनीम् ॥२४॥
आघातं नखरैश्च नाभिचरणग्रीवाकुचोरःस्थले
कृत्वाऽऽलिख्य च भूतनाथदिवसे कुर्यात्सुधीर्विह्वलाम् ॥२५॥

हस्तिन्याश्चन्द्रकलाप्रबोधनविधिः ।

आकण्ठं परिरभ्य दोर्लतिकया निष्पीय वक्त्राम्बुजं
कक्षान्तःस्तनमण्डलोदरतटीं चञ्चन्नखैरामृशन् ।

---

१ दन्ताश्च औष्ठौ च दन्तौष्ठं, तेन । २ 'कुचयुगं चाकृष्य' ग. ।

क्षोणीभृत्तनयातिथावथ मुहुः कामालयं संस्पृश-
न्सन्दश्याधरपल्लवं ग्रहतिथौ कुर्याद्द्रुतां हस्तिनीम् ॥ २६ ॥
संपूर्णेन्दुतिथौ परिक्षयदिने तस्यैव तुल्या तिथि-
स्तस्यामेव वशीकृता शशिकलासंबोधनैः कामिनी ।
कामागारचुचूलिकासु करजैर्दन्तैश्च दन्तच्छदै-
राश्लेषैः परिचुम्बनैश्च विविधैरित्याह नन्दीश्वरः ॥ २७ ॥

पद्मिन्यादीनां रतिकालनिरूपणम् ।

यामिन्याः कथितश्चतुर्थचरणः कालो नलिन्या रते
प्रारम्भप्रहरे प्रयाति सुखतां चित्रप्रिया चित्रिणी ।
शङ्खिन्याः समुदीरितः कविवरैर्यामस्तृतीयो रतौ
मातङ्गी द्रवतामुपैति नितरां नक्तंदिनस्यार्धयोः ॥ २८ ॥
सुखयति न पुमांसं पद्मिनी क्वापि रात्रौ
निधुवनमिति तस्यां[1] नैव किंचित्प्रयोज्यम् ।
शिशुरपि यदि कान्तां वासरे तामुपेया-
द्विकसति रवियोगात्सा हठात्पद्मिनीव ॥ २९ ॥

नारीणां सत्त्वसमुद्देशः ।

त्रिवलिवलितमध्या कम्बुकण्ठी विदग्धा
कमलसुरभिदेहा केतकीगर्भभव्या ।
शुचिचरितपवित्रा शीलसंतोषयुक्ता
सुललितपिकवाणी स्यादियं देवसत्त्वा ॥ ३० ॥
बहुलचपलदृष्टिर्नृत्यगीतादिदक्षा
मधुरबहलसुगन्धा पुष्पमालानुरक्ता ।
शिशिरसुरभिमासक्रीडनप्रेमपात्री
भवति रुचिरमूर्तिः सैव गन्धर्वसत्त्वा ॥ ३१ ॥
गुरुकुचयुगभारा गौरदेहा नताङ्गी
तरुणहरिणनेत्रा कोपना वीतलज्जा ।

---

१ तस्यामिति रात्रावित्यर्थः ।

विविधमधुरवाक्या मत्स्यमांसानुरक्ता
मुनिभिरियमनर्घा यक्षसत्त्वा प्रदिष्टा ॥ ३२ ॥
गिरिविहरणविज्ञा रात्रिसंचारवीरा
मलिनपिशुनचित्ता कुत्सिताहारचेष्टा ।
विकृतवदनचन्द्रा कृष्णवर्णाऽतिखर्वा
मलिनवसनरक्ता कीर्तिता प्रेतसत्त्वा ॥ ३३ ॥

इति कविशेखरश्रीज्योतिरीश्वरविरचिते पञ्चसायके जात्यादि-
समुद्देशो नाम प्रथमः सायकः ।

---

## अथ द्वितीयः सायकः ।

### रतभेदाः ।

आयामैः परिणाहकैश्च पुरुषा लिङ्गैर्वराङ्गैः स्त्रियो
ज्ञातव्याश्च[1] रसगृहारुणसमाख्याताङ्गुलैः सर्वतः ।
जात्या तेऽपि शशा वृषाश्च[2] तुरगाः प्राज्ञैः स्मृतास्ता पुन-
र्मृग्यश्वा करिणीति विस्तरभयात्संक्षिप्य निष्कृष्यते ॥ १ ॥
शशकहरिणपत्न्योर्गोतुरङ्ग्योस्तथैव
हयगजपतिनार्योरेकरूपं रतं स्यात् ।
इह भवति नितान्तं प्रीतिरन्योन्ययोगा-
दनुमरणमशक्यं[3] स्त्री कथं स्वीकरोति ॥ २ ॥
मृगीवृषं चेद्वृषभीतुरङ्गमत्युच्चमेतद्वितयं वदन्ति ।
अश्वाशशं गोकरिणीसमुत्थं नीचद्वयं तुष्टिकरं न यूनोः ॥ ३ ॥
मृगीहयं हस्तिवधूशशं चेदत्युच्चनीचं सुरतं वदन्ति ।
प्रमाणभेदेऽपि न च द्रवन्ति तस्मिन्न तृप्यन्ति नितम्बवत्यः ॥ ४ ॥

---

१ 'ज्ञेयाश्चाब्धिरसग्रहारुण०' क. । २ 'वृषाश्च तुरगा अश्वा' इति क. । ३ 'अन्यथा' इत्यध्याहार्यम् ।

प्रोक्तरतानामुत्तममध्यमाधमत्वम् ।

स्त्रीपुंसयोस्तुल्यरतं प्रशस्तं मध्यद्वयं मध्यममामनन्ति ।
अत्युच्चकं चाप्यतिनीचकं च निन्द्यं रतज्ञैः सुरतं प्रदिष्टम् ॥ ५ ॥
प्रीतिः समा स्यात्सुरते समाख्ये नीचद्वये योषित एव तुष्टिः ।
अत्युच्चके वाऽप्यतिनीचके वा तुष्टिर्न पुंसां नच सुन्दरीणाम् ॥६॥

वेगभेदात्सुरतभेदाः ।

प्रचण्डवेगोऽप्यथ मध्यवेगस्तथाऽपरः स्याल्लघुनामधेयः ।
पुंसस्तरुण्या उभयोरपीह त्रिधा कवीन्द्राः सुरतं वदन्ति ॥ ७ ॥

इदानीं शशादीनां स्वरूपं निरूप्यते ।

दीर्घाक्षाः स्थूलदेहा लघुसमदशना लम्बकर्णाः सुवाचो
ग्रीवायां जानुदेशे करकमलतले कालिमानं वहन्तः ।
अल्पाहाराल्पशौचा दिनमधिशयिनः कान्तिमन्तो बलाढ्याः
क्रीडावन्तो विनीता लघुतरसुरताः पुण्यभाजः शशाः स्युः ८
सुचारुकेशो मृदुवाक् सुवेशः सुदीर्घकण्ठश्चपलः सुनेत्रः ।
सुरक्तपाणिः समदन्तपंक्तिः सौभाग्ययुक्तः कथितो मृगोऽयम् ९
स्फाराकाराः सदर्पाः सुरतरसकलालम्पटाः सुन्दराङ्गा
व्यूढोरस्काः सुरूपाः सुसमजठरिणो मांसला लोलनेत्राः ।
अत्यन्तप्रौढवाचोऽपरिलघुधृतयः क्रोधना मध्यवेगा
उक्षाणो लिङ्गमीषद्वितनवमितैरङ्गुलीकैर्वहन्ति ॥ १० ॥
कार्ये धृष्टा बलिष्ठाः सितशमदशनाः पीवरास्या वराक्षा
ग्रीवाबाहूरुदीर्घाः परहितनिरताः सात्त्विकाः स्निग्धवाचः ।
निर्लज्जाश्चारुशीलाः पृथुतरगतयश्चण्डसंभोगरक्ता
अश्वा लिङ्गं वहन्तो युवतिजनमतं भानुसंख्याङ्गुलीकम् ॥ ११ ॥

---

१ 'अत्युच्चनीचं सुरतं वदन्ति मृगीहयं हस्तिवधुशशं च' क. ।
२ 'धनाढ्याः' ग. । ३ उपलक्षणे तृतीयैषा । ४ 'हृष्टा' ग. ।
५ 'पीवरा स्फारवक्त्रा'

मृग्यादीनां स्वरूपनिरूपणम् ।

मृद्वङ्गी दीर्घनेत्रा वरबिसलतिकाकोमला दीर्घबाहुः
शोणाम्भोजाभिरामं वहति करयुगं ह्रस्वमध्या सुकेशी ।
सुश्रोणीः कम्बुकण्ठी पृथुकुचयुगला या वहत्यङ्गुलीकैः
षड्भिः कन्दर्पगेहं कथयति हरिणीं तामिह ज्योतिरीशः १२

व्यानिम्नोत्तुङ्गशीर्षा बहुतरकपिशस्थूलकेशप्रचारा
चञ्चन्नीलाम्बुजाक्षी सुललितवदना तुङ्गवक्षोजभारा ।
गम्भीरावर्तनाभिर्वलिभिरुपगता श्रोणिभारालसाङ्गी
सेयं रन्ध्राङ्गुलीकं वहति रतगुहारन्ध्रकं वै तुरङ्गी ॥ १३ ॥

स्थूलाङ्गी स्थूलगण्डा लघुतरनयना स्थूलनीलाल्पकेशा
बिम्बोष्ठी पीनबाहुः कठिनगुरुकुचा हीनपर्वाऽतिदुष्टा ।
निर्लज्जा रासभोक्तिस्तरलितवदना सर्वदा कष्टसाध्या
निर्दिष्टा हस्तिनीयं वहति रविसमैरङ्गुलैर्गुह्यदेशम् ॥ १४ ॥

अथ स्त्रीणामवस्थाविशेषाः कथ्यन्ते ।

षोडशवर्षवयस्कां बालामित्यालपन्ति धीमन्तः ।
विंशात्तरुणीं त्रिंशात्प्रौढां पञ्चाशतो वृद्धाम् ॥ १५ ॥

बाला नूतनसंगमे रतिकरी सान्द्रान्धकारे भवे-
दालोके सुखमातनोति तरुणी संभोगलीलाविधौ ।
आलोकेऽपि सुखायते सरभसं प्रौढा तमिस्रेऽङ्गना
वृद्धा जीवितहारिणी न कुरुते कुत्रापि सौख्यं मनाक् ॥१६॥

अथ देशविशेषात् स्त्रीस्वरूपं निरूप्यते ।

रूक्षाङ्गी बहुवर्णिनी चलमतिर्गीतप्रिया चौटुला
शैलाम्भोनिधिपार्श्वदेशवनिता प्रायो भवेदीदृशी ।
अम्भोदागमपुष्पमाससमये सेव्याः पुनः प्रीणिता
गुर्वाहारसुगन्धिमाल्यवसनस्निग्धाङ्गरागादिभिः ॥ १७ ॥

---

१ नवाङ्गुलीकमित्यर्थः । २ 'रक्ताङ्गी बहुवादिनी' ग. । ३ 'वातला' क. । ४ 'वर्षायां कुसुमाकरे च बहुशः' ग. ।

गूढग्रन्थिरहर्निशं हि सकले गात्रे वहत्युच्छतां-
मम्भोजप्रसवारुणोत्तमकरा शीतालयप्रेयसी ।
सौराष्ट्री च कलिङ्गदेशयुवतिः कामं भवेत्पित्तला
हेमन्ते शिशिरे नरैरविरतं सेव्या यथाकांक्षया ॥ १८ ॥
ज्ञेया कोकिलकाकलीकलरवा मेदस्विनी शीतला
निद्रालुश्च शिरीषकोमलतनुः स्निग्धानना श्लेष्मला ।
वङ्गश्रीहटकामरूपतरुणी शीतादिना शङ्किता
गन्तव्या शरदि प्रकृष्टमदना ग्रीष्मे नरैरादृता ॥ १९ ॥
शुचिचरितविचित्रा चित्रसंभोगमित्रा
नखदशनविरक्ता शिल्पशिक्षानुरक्ता ।
स्थिरमतिनिजबन्धुः कामसर्वस्वसिन्धु-
र्भवति रुचिरवेषा कामिनी मध्यदेशा ॥ २० ॥
करकुचकरजाताश्लेषविन्यासदक्षा
सकलसुरतबन्धुर्ज्ञानवैदग्ध्यदक्षा ।
नलघुनगुरुरंगा प्रायशः कामरक्ता
रमयति मधुराल्पं सुन्दरी तैरभुक्ती ॥ २१ ॥
मृदुवचनविभागा कोमलानङ्गभागा
विगतरमणनी(भी)तिः कोमलानङ्गगीतिः ।
द्रवति झटिति कान्ता चित्रसंभोगदक्षा
रमयति किल कौली कीर्तिता वङ्गीगौडी ॥ २२ ॥
करतलहतितुष्टा बाह्यसंभोगहृष्टा
चिरनिधुवनसाध्या मालवी धूर्तवाक्या ।
सुखयति सुखवेगा व्यञ्जितानङ्गरागा
चपलपिशुनशीला स्यादियं चोलबाला ॥ २३ ॥

१ 'वहत्युष्णतां' ख. । २ 'नन्दैषिगी' इति ग. । ३ 'शीतादिकालं विना' ग. ।

कुवलयदलवर्णा चारुतांटङ्ककर्णा
चकितहरिणनेत्रा फुल्लराजीववक्त्रा ।
लघुनिधुवनरक्ताऽकष्टसंभोगसक्ता
सुललितगतिरेषा गुर्जरी चारुवेषा ॥ २४ ॥
अलसवलितदृष्टिर्दिव्यरूपाङ्गयष्टिः
कठिनमदनवेगा दुःखसाध्या प्रयोगे ।
विरमति सुरतान्ते कोपमायाति कान्ते
विविधपुरुषलोला सैन्धवी दुष्टशीला ॥ २५ ॥
पुलककरजदात्री दुष्टवाक्याभिधात्री
विषमसुरतपात्री निश्चितं कालरात्री ।
इति भवति पुरन्ध्री कोशलावन्तिका स्त्री
कवलयति रतार्ता श्रूयते पूर्ववार्ता ॥ २६ ॥
पिकवरमृदुवाचः कोमलाङ्ग्यः सुरम्या
व्यपगतभयलज्जाः साहसिन्यः स्वतन्त्राः ।
लघुनिधुवनसाध्याश्चीनसौवीरभेद-
द्रविडमलयजाताः सुन्दराङ्ग्यस्तरुण्यः ॥ २७ ॥
सकलसुरतदक्षा सिद्धिसौभाग्यवश्या
दशनवसनपानप्रीतिभाजः सलज्जाः ।
करजलिखनदक्षाश्चण्डवेगाभिरम्याः
कुसुमसुरभयः स्युर्मद्रतैलङ्गनार्यः ॥ २८ ॥
सुरतरसविमर्दप्रेमवत्यः प्रचण्डाः
करजदशनकेशाश्लेषसंज्ञाविहीनाः ।
सहजमलिनचित्ताः पौण्ड्रकाम्बोजजाताः
करतललयतुष्टाः कामरूपाङ्गनाः स्युः ॥ २९ ॥

---

१ ताटकं कर्णभूषणं, 'तरकी'–'तरोना' इति भाषायां प्रसिद्धम् । २ '०नेत्रा' ग. । ३ 'अमलचकित०' ग. । ४ 'परुष०' ग. । ५ 'तुल्यरूपा०' ग. ।

गाढं संश्लिष्य कण्ठे लिखति कररुहैः सर्वतः कान्तदेहं
केशेष्वाकृष्य चुम्बत्यधरमविरतं मुष्टिघातं ददाति ।
तृप्तिं नो याति शीघ्रं द्रवति न च रते चण्डवेगा प्रगल्भा
ज्ञातव्याः पण्डितेन्द्रैरतिकलितरतिर्लाटकर्णाटनारी ॥ ३० ॥

दुष्टा दुर्गन्धदेहाः पशुसमसुरताश्चुम्बनाश्लेषहीनाः
सेर्ष्या म्लेच्छाङ्गनाः स्युर्लघुरतनिरताः पार्वतीयाश्च नार्यः ।
काश्मीराभीरगन्ध्याः सकलरसकलामोददक्षा नितान्तं
साध्या देशानुसारादिह पटुमतिभिर्योषितः सर्वदैव ॥३१॥

जातेस्तत्त्वं समस्तं निखिलशशिकलाबोधनं सत्त्ववृत्तिं
मृग्यादीनां वशत्वं मदनरसकलाकौतुकं चाप्यशेषम् ।
इत्थं यः कामिनीनां कलयति चरितं देशसात्म्येन सम्य-
ग्यावज्जीवं स तस्याः प्रभवति हृदये प्राणनाथः सुखाय ३२

### योनिभेदनिरूपणम् ।

स्पर्शेन पङ्कजसमा तरुणीजनाना-
मभ्यन्तरे च गुटिकासमदेशका च ।
योनिर्भवेदथ वलिप्रकरावकीर्णा
गोजिह्विकासुखरकर्कशगर्भदेशा ॥ ३३ ॥

अत्युत्तमा प्रकथिता प्रथमा कवीन्द्रै-
र्मध्या च मध्यमविधा किल संप्रदिष्टा ।
शेषद्वयं मदनकेलिकलारसज्ञै-
र्निन्द्यं सदैव कथितं सुरतोत्सवेषु ॥ ३४ ॥

वह्निर्न शान्तिमुपयाति कदाऽपि काष्ठै-
र्नाम्भोनिधिर्विरमति प्रचुरैः पयोभिः ।
नाप्यन्तको जगति जन्तुभिरेति तोषं
वामाऽपि नैव पुरुषैः खलु याति तृप्तिम् ॥ ३५ ॥

तस्मान्नरेण रतिरङ्गविचक्षणेन
मायामुपास्य सकलां स्वशरीरसाध्याम् ।

Indira Gandhi National Centre for the Arts

तासां मनोहरणमेव परं विधेयं
नो वेद कोऽपि हृदयं खलु कामिनीनाम् ॥ ३६ ॥

प्रीतिभेदनिरूपणम् ।

स्रक्चन्दनाम्बरमनोहरभक्ष्यभोज्यै-
र्नानाविधैरुपचिता विषयैः सदैव ।
प्रीतिः स्मृता विषयजेति कविप्रवीरैः
साद‍ृश्ययोगसुभगा कथिता सदैव ॥ ३७ ॥

आखेटशिल्पसुरपूजनकेलिरङ्ग-
सङ्गीतसेवनविधावुपचीयते या ।
अभ्यासकौशलववशेन कृशोदरीणा-
माभ्यासकी निगदिता कविभिः पुराणैः ॥ ३८ ॥

स्त्रीणां रागविनाशहेतवः ।

दारिद्रदुःखभयविक्लवमानरोगै-
रुद्वेगकोपतनुतादिभिरीश्वराणाम् ।
रागं त्यजन्ति वनिता इह विस्तरस्य
भीत्या न चास्य कथितः सकलो विवर्तः ॥ ३९ ॥

इति श्रीकविशेखरज्योतीश्वरविरचिते पञ्चसायके द्वितीयः सायकः ।

---

## अथ तृतीयः सायकः ।

देहदौर्गन्ध्यहरणयोगाः ।

प्रागङ्गरागः पुरुषेण कार्यः स्त्रिया च संभोगसुखाय गात्रे ।
तस्मादहं गन्धविधानमादौ विलासिनः सर्वमुदीरयामि ॥ १ ॥
हरीतकीलोध्रमरिष्टपत्रं सप्तच्छदो दाडिमकल्कलं च ।
एषोऽङ्गनायाः कथितः कवीन्द्रैः शरीरदौर्गन्ध्यहरः प्रलेपः ॥२॥
हरीतकीचन्दनमुस्तनागैरुशीरलोध्रामयरात्रितुल्यैः ।

---

१ ‘समा च’ इति ग. ।

स्त्रीपुंसयोर्घर्मजगात्रगन्धं विनाशयत्याशु विलेपनं च ॥ ३ ॥
हरीतकीश्रीफलमुस्तयुक्तैर्बिम्बीफलैः पूतकरञ्जबीजैः ।
कक्षादिदौर्गन्ध्यमतिप्रभूतं विनाशयत्याशु हठेन योगः ॥ ४ ॥
( सचन्दनोशीरकबिल्वपत्रैः कोलाक्षमज्जागुरुनागपुष्पैः ।
लिप्त्वा शरीरं प्रमदा जवेन चिरप्ररूढं विनिहन्ति गन्धम् । )
सदाडिमत्वङ्मधुलोध्रपत्रैः पिष्टैः समानैः पिचुमर्दपत्रैः ।
विलिप्य गात्रं तरुणी निदाघे दौर्गन्ध्यकं घर्मभवं निहन्ति ॥ ५ ॥
सकेसरोशीरशिरीषलोध्रैश्चूर्णीकृतैरङ्गविलेपनेन ॥
ग्रीष्मे नराणां न कदाचिदेव घर्मस्रुतिः स्यादिति भोजराजः॥६॥

### महापरिमलं तैलम् ।

आदौ बिल्वदलं ततो मरुवकं पुष्पाण्यशोकस्य तु
प्रत्यादित्यमजस्रमेव तिलजे तैले घटे निःक्षिपेत् ।
केतक्याः कुसुमानि चेह मुहुशः शेषे क्षिपेदादरा-
दित्थं कार्यमिदं महापरिमलं तैलं नरैः सिद्धये ॥ ७ ॥

### स्नानीयसुगन्धिनिरूपणम् ।

स्वर्णाम्बुदोशीरमिशीयुतानां पथ्यान्वितानां च विलेपनेन ।
स्नात्वा नरः सौरभमेव मासाच्चैक्कण्यमाप्नोति शिरोरुहाणाम् ॥८॥
पथ्यारसालामलकीफलानां सजम्बुजीमूतदलामयानाम् ।
मांसीयुतानां परिलेपनेन स्नायान्नरः सौरभकान्तिवृध्यै ॥ ९ ॥

### देहसौरभ्यकरा योगाः ।

हरीतकीतोयदतुल्यभागौ वनेचरस्यापि चतुर्थभागः ।
तदर्धभागः कथितो नखस्य स्यादेष गन्धो मदनप्रकाशः ॥१०॥
एलाशटीपत्रकचन्दनानि तोयाभयाचन्द्रघनामयानि ।
सुसौरभोऽयं सुरराजयोग्यः ख्यातः सुगन्धो नरमोहनार्थः ११
ऐणेयकाश्मीरघनाम्बुलोहनिशाकरोशीरसमानि पिष्ट्वा ।

---

१ 'चिञ्चाफलैः' ग. । २ अयं श्लोकः क. पुस्तके नोपलभ्यते ।
३ 'देहाङ्गरागो' ग. । ४ '०रसानि' ग. ।

लेपः प्रियोऽयं सुरमानवानामुदीरितः पूर्वकवीन्द्रवर्यैः ॥ १२ ॥
उशीरकृष्णागुरुचन्दनानि पत्राम्बुतुल्यानि समानि पिष्ट्वा ।
एतानि गात्रेषु विलासिनीनां श्रीखण्डतुल्यं प्रथयन्ति गन्धम् ॥ १३

सर्वोत्तमसुगन्धयोगाः ।

जातीकर्कटरक्तचन्दनघनश्रीवासशैलेयकं
कस्तूरीकनकामतङ्गकुसुमैः स्थौणेयकैः संयुतम् ।
एतानीन्दुयुतानि पर्णजरसैः पिष्टोऽङ्गरागः शुभः
कार्यो गन्धकलाकलापकुशलैः क्षोणीन्द्रयोग्यः सदा ॥१४॥
पथ्या भागचतुष्टयं जलमुचो भागैकमात्रं मतं
व्याधेर्भागचतुष्टयं च शशिनः स्थौणेयभागद्वयम् ।
भागाः पञ्च शिलोद्भवस्य कथिता भागो नखस्यापि च
कस्तूरीदलसंज्ञकं निगदितं सौरभ्यविज्ञैरिदम् ॥ १५ ॥
पथ्याभागचतुष्टयं जलमुचो भागैकमात्रं सदा
श्रीखण्डागुरुजातिकामृगमदस्योक्ताश्च भागास्त्रयः ।
मांसीपत्रतुषारवालकसमैः सम्यक्तया पेषितः
सर्वैरेभिरिहोत्तमः प्रकथितः सौरभ्यगर्भाभिधः ॥ १६ ॥

मुखवासयोगाः ।

रसालजम्बूफलगर्भसारः सकर्कटो माक्षिकसंयुतश्च ।
स्थितो मुखान्तः पुरुषस्य रात्रौ करोति सौरभ्यसुखं मुखस्य १७
गुडत्वगेलानखजातिकाद्यैः स्वर्णान्वितैः क्षुद्रवटी विधेया ।
ताम्बूलगर्भा दिवसे च रात्रौ करोति पुंसां मुखवासमिष्टम् ॥१८॥
यः कुष्ठचूर्णं मधुना घृतेन पीकाक्षबीजान्वितमत्ति नित्यम् ।
मासैकमात्रेण मुखं तदीयं गन्धायते केतकिपुष्पतुल्यम् ॥१९॥

वाजीकरणसमुद्देशः ।

बलेन नारी परितोषमेति न हीनवीर्यस्य कदाऽपि सौख्यम् ।
अतो बलार्थं रतिलम्पटस्य बीजाभिवृद्धिं प्रथमं विदध्यात् ॥२०॥

---

१ 'जात्या भागयुतं' ग. । २ 'सौरभ्यसौ' ग. ।

चूर्णं विदार्याः स्वरसेन तस्याः सुभावितं भास्कररश्मिजालैः ।
मध्वाज्यसंमिश्रितमाशु लीढ्वा दश स्त्रियो गच्छति निर्विशङ्कः २१
भूयो विभाव्यामलकस्य चूर्णं रसेन तस्यैव सिताज्यमिश्रम् ।
सक्षौद्रमालेढि निशामुखे यो नूनं स वृद्धस्तरुणत्वमेति ॥२२॥
शतावरीगोक्षुरवानरीणां गोरक्षमातङ्गबलाबलानाम् ।
क्षीरेण चूर्णानि निपीय रात्रौ मथ्नाति दर्पं तरुणीजनस्य॥२३॥
यो वर्तकीलावकपिञ्जलानां मांसं तथा वेश्मविहङ्गमस्य ।
घृतेन सिद्धं सह सैन्धवेन महाबलः स्यादुपभुज्य नूनम् ॥ २४ ॥
शतावरीगर्भमिदं ससर्पिः पचेत्पयोभिर्दशभागयुक्तैः ।
सितोपलाभ्यां मधुसंप्रयुक्तं नास्माद्द्वितीयं भुवि दृष्टमन्यत्॥२५॥
सितपिकतरुबीजं तण्डुलाः षष्टिकानां
सघृतमधुसमेतं प्रत्यहं योऽवलेढि ।
जठरकुहरमध्ये याति यावन्न पाकं
रमयति कृशदेहोऽप्यङ्गनानां समूहम् ॥ २६ ॥
मांसीं विदारीं च तथोच्चटां च क्षीरे गवां क्षौद्रघृतोपपन्नाम् ।
पीत्वा नरः शर्करया सुयुक्तां कुलिङ्गवद्धृष्यति सर्वरात्रम् ॥२७॥
लघुशाल्मलिमूलेन तालमूलीं सुचूर्णिताम् ।
सर्पिषा पयसा पीत्वा रतौ चटकवद्भवेत् ॥ २८ ॥
वृद्धशाल्मलिमूलस्य रसं शर्करया पिबेत् ।
एतत्प्रयोगात्सप्ताहाज्जायते रेतसोऽम्बुधिः ॥ २९ ॥

योनिगाढीकरणसमुद्देशः ।

प्रौढाङ्गनाया नवसूतिकायाः श्लथं वराङ्गं न सुखाय यूनाम् ।
तस्मान्नरैर्भेषजतो विधेया गाढक्रिया मन्मथमन्दिरस्य ॥ ३० ॥
निशाद्वयं पङ्कजकेसरं च निष्पिष्य देवद्रुमतुल्यभागम् ।
अनेन लिप्तं मदनातपत्रं प्रयाति संकोचमलं युवत्याः ॥ ३१ ॥
सधातुकीपुष्पफलत्रिकेण जम्बुत्वचा सारघसंयुतेन ।
लिप्त्वा वराङ्गं मधुकेन तुल्यं वृद्धाऽपि कन्येव भवेत्पुरन्ध्री ३२

पिकाक्षबीजेन मनोजगेहं विलिप्य योषा नियमं चरन्ती ।
हठेन गाढं लभते वराङ्गं दृष्टो नरेरेष सदैव योगः ॥ ३३ ॥
या शक्रगोपं स्वयमेव पिष्ट्वा विलिम्पति स्त्री कुसुमेषुवेश्म ।
आह स्म तस्याः कठिनं च गाढं भवेच्च नात्रास्ति विकल्पशङ्का ३४
इन्दीवरव्याधिवचाकणानां तुरङ्गगन्धायुगयामिनीनाम् ।
लेपेन नार्याः स्मरवेश्मरन्ध्रं संकोचयत्याशु हठेन योगः ॥३५॥
मदनकघनसारैः क्षौद्रतुल्यैर्वराङ्गं
शिथिलितमपि यस्याः पूरितं भूय एव ।
भवति कठिनमुच्चैः कर्कशं कामिनीना-
मिति निगदति योगं रन्तिदेवो नरेन्द्रः ॥ ३६ ॥

द्रावणसमुद्देशः ।

यद्यप्यष्टगुणाधिको निगदितः कामोऽङ्गनानां सदा
नो याति द्रवतां तथाऽपि झटिति व्यायामिनां सङ्गमे ।
तस्माद्भेषजसंप्रयोगविधिना संक्षेपतो द्रावणं
किञ्चित्पल्लवयामि पङ्कजदृशां प्रत्यायकं कामिनोः ॥ ३७ ॥
सिन्दूरचिञ्चाफलमाक्षिकाणि तुल्यानि यस्या मदनातपत्रे ।
क्षिप्तानि वै सा पुरुषप्रसङ्गात्प्रागेव रेतःस्रुतिमातनोति ॥ ३८ ॥
घोषारजः क्षौद्रसमन्वितं तु क्षिप्तं यदीये स्मरयन्त्रगेहे ।
द्रुता भवेत्सा हठतो हि नारी दृष्टः सदाऽयं किल योगराजः ३९
अगस्तिपत्रद्रवसंयुतेन मध्वाज्यसंमिश्रितटङ्कणेन ।
लिप्त्वा ध्वजं यो रमतेऽङ्गनां यां सा शुक्रमावर्षति शीघ्रमेव ४०
सरोध्रधत्तूरकपिप्पलीनां क्षुद्रोषणक्षौद्रविमिश्रितानाम् ।
लेपेन लिङ्गस्य करोति रेतःस्रुतिं विपक्षप्रमदाजनस्य ॥ ४१ ॥
तुषजलपरिमिश्रैर्बीजपूरस्य मूलै-
र्दिवसकरमयूखैर्मर्दितैः कामवेश्म ।
द्रवति झटिति लिप्तं भेषजस्यास्य योगा-
दिति वदति नरेन्द्रो रन्तिदेवः कवीन्द्रः ॥ ४२ ॥

लिङ्गस्थूलीकरणसमुद्देशः ।

सकुष्ठमातङ्गबलाबलानां वचाश्वगन्धागजपिप्पलीनाम् ।
तुरङ्गशत्रोर्नवनीतयोगाल्लेपेन लिङ्गं मुशलत्वमेति ॥ ४३ ॥
सरोध्रकाशीशतुरङ्गगन्धामातङ्गगन्धापरिपाचितेन ।
तैलेन वृद्धिं खलु यान्ति शीघ्रं वराङ्गकर्णस्तनमेहनानि ॥ ४४ ॥

अथ ध्वजदृढीकरणसमुद्देशः ।

हयारिपत्रं नवनीतपिष्टं वचाबलानागबलामयैश्च ।
लेपेन लिङ्गं सहसैव पुंसां लोहोपमं स्यादिति दृष्टमेतत् ॥४५॥

अथ वीर्यस्तम्भनसमुद्देशः ।

क्षीरेण बस्तस्य[1] च बद्धमूलं लज्जालुमूलं स्वयमेव पिष्ट्वा ।
यस्तु स्वपादौ परिलिप्य शेते रेतो न तस्य स्रवते कदाचित् ॥४६॥
श्वेतेषुपुङ्खाख्यतरोः फलानि क्षीरेण पिष्ट्वा वटपादपस्य ।
करञ्जबीजोदरमध्यगानि बध्नन्ति वीर्यं वदने धृतानि ॥ ४७ ॥
श्वेतेषुपुङ्खाचरणं गृहीत्वा पुष्यार्कयोगे पुरुषस्य कट्याम् ।
कुमारिकाकर्तितसूत्रकेण बद्धं न यात्याशु मनोजनीरम् ॥ ४८ ॥
आदाय कृष्णेतरकाकजङ्घामूलं सिताम्भोरुहकेशरं च ।
क्षौद्रेण पिष्ट्वा परिलिप्तनाभेः स्तम्भं प्रयात्याशु नरस्य बीजम् ।४९।

अथ वशीकरणतिलकसमुद्देशः ।

मञ्जिष्ठतोयदवचासितभानुमूलैः
स्वीयाङ्गशोणितयुतैः समकुष्ठकैश्च ।
कृत्वा ललाटफलके तिलकं कृतज्ञो
लोकत्रयं वशयति क्षणमात्रकेण ॥ ५० ॥

अथ वशीकरणाञ्जनसमुद्देशः ।

देवीमहोत्सवदिने किल कज्जलं यत्
सिद्धार्थकस्य सुरसेन[2] नरोत्तमाङ्गे ।

---

१ बस्तस्येति जातिपरं, तेन अजाक्षीरमत्र ग्राह्यम् । २ सुरसेन तैलेन ।

निष्पातितं नरवरेण निशि श्मशाने
तन्नेत्रगं भुवनमेव वशं करोति ॥ ५१ ॥

अथ वशीकरणचूर्णसमुद्देशः ।

कुष्ठोत्पलं मधुकरस्य च पत्रयुग्मं
मूलं तथा तगरजं सितकाकजङ्घा ।
यस्याः शिरोगतमिदं विहितं तु चूर्णं
दासीभवेज्झटिति सा तरुणी न चित्रम् ॥ ५२ ॥

अथ वशीकरणलेपनसमुद्देशः ।

सव्येन पाणिकमलेन रतावसाने
यो रेतसा निजभवेन विलासदक्षः ।
वामं विलिम्पति पदं सहसैव यस्या-
स्तस्यैव सा भवति नात्र विकल्पभावः ॥ ५३ ॥
सम्भोगशेषसमये निजकान्तमेढ्ं
या कामिनी स्पृशति वामपदाम्बुजेन ।
तस्याः पतिः सपदि विन्दति दासभावं
गोणीसुतेन कथितः किल योगराजः ॥ ५४ ॥
सिन्धूत्थमाक्षिककपोतमलानि पिष्ट्वा
लिङ्गं विलिप्य तरुणीं रमते नरो यः ।
साऽन्यं प्रयाति पुरुषं न कदाऽपि कामं
दासीभवेदतिमनोहरदिव्यमूर्तिः ॥ ५५ ॥
भल्लूकमेढ्घनसारमधूनि पिष्ट्वा
लिप्तध्वजो निधुवनं विदधीत यस्याः ।
साऽऽह्लादिनी कुसुमसायकसन्नताङ्गी
वश्या भवेच्चिरतरं न हि संशयोऽत्र ॥ ५६ ॥
गोरोचनाशिशिरदीधितिशम्भुबीज-
काश्मीरचन्दनयुतैः कनकद्रवेण ।

लिङ्गध्वजः परिरमत्यबलां नरो य-
स्तस्याः स एव हृदये मुकुटत्वमेति ॥ ५७ ॥

अथ वशीकरणधूपसमुद्देशः ।

शृङ्गीवचायुवतिसर्जरसं समानं
कृत्वा त्रुटिं मलयजं च षडेव मिश्रम् ।
यो धूपयेन्निजगृहं वसनं शरीरं
तस्यापि दास इव मोहमुपैति लोकः ॥ ५८ ॥

अथ वशीकरणमन्त्रसमुद्देशः ।

मदमदपदमादौ मादयेति द्विवारं
तदनु च लिखनीयं सौख्यदं ह्रीं च तस्मात् ।
अथ च पदमुपान्ते नामरूपादिसंज्ञो
भवति मदनमन्त्रः स्वाहया संयुतोऽयम् ॥ ५९ ॥
'ॐ मद मद मादय मादय ह्रीं अमुकीं वशमानय स्वाहा'
शतशतपरिजापात् स्यादयं सिद्धिदाता
दशदशकुसुमानां लोहितानां च होमात् ।
इह तु सकलकार्यं वामहस्तेन कार्य-
मुपदिशति समासाज्ज्योतिरीशः स्वरूपम् ॥ ६० ॥

अस्य मन्त्रस्य दशसहस्रसङ्ख्याकोन्मितो जपः, रक्तवर्णैः प्रसूनैर्मधुना घृतेन च होमः करणीयः । सर्वं वामहस्तेन कर्तव्यम् । अथ ध्यानम्—

कनकरुचिरमूर्तिः कुण्डलाकृष्टचापो
युवतिहृदयमध्ये निश्चलारोपिताक्षः[१] ।
इति मनसि मनोजं ध्याययेद्यो जपस्थो
वशयति स समस्तं भूतलं मन्त्रशक्त्या ॥ ६१ ॥

अथ चामुण्डमन्त्रः ।

चामुण्डे प्रथमं जयेति कथितं संबोधनं मोहय
ज्ञातव्यं वशमानयेति च पदं साध्यं द्वितीयायुतम् ।

---

१ 'स्फुरति हृदयमध्ये निश्चितारोपिताक्षः' इति ग. ।

स्वाहान्तः प्रणवादिरेष प्रथितस्तन्त्रे महामोहनः
सन्मन्त्रः कविशेखरेण कथितो नास्माद्द्वितीयो भुवि ॥ ६२ ॥

'ॐ चामुण्डे जय चामुण्डे मोहय अमुकीं वशमानय स्वाहा' इति मन्त्रः । अस्य मन्त्रस्य जप एकलक्षमितः, पलाशकुसुमैर्होमः दशांशं, सर्वं वामहस्तेन कर्तव्यम् । अथ चामुण्डाया ध्यानम्—

दंष्ट्राकोटिविसङ्कटा सुवदना सान्द्रान्धकारे स्थिता
खट्वाङ्गासिनिगूढदक्षिणकरा वामे सपाशं शिरः ।
श्यामा पिङ्गलमूर्धजा भयकरी शार्दूलचर्माम्बरा
चामुण्डा शववाहिनी जपविधौ ध्येया सदा साधकैः॥६३॥

अथ विश्वेश्वरीमन्त्रः ।

ओङ्कारः प्रथमं नमो नम इति प्रोक्तं च तस्मात्पदं
चामुण्डे परिकीर्तितं हिलि हिलि ज्ञेया च संज्ञा ततः ।
ज्ञातव्यं तु समानयेति च पदं सन्मन्त्रिणां संमतो
मन्त्रोऽयं कविशेखरेण कथितः ख्यातः सदा सिद्धिदः ६४

'ॐ नमो नमश्चामुण्डे हिलि हिलि अमुकीं वशमानय स्वाहा' अस्य मन्त्रस्य जप एकलक्षपरिमितः, तद्दशांशः पलाशकुसुमैर्होमः करणीयः, सर्वं वामहस्तेन कर्तव्यम् ॥

अथ विश्वेश्वरीध्यानम् ।

वज्रासक्तशरासना त्रिनयना सव्येतरेणाङ्कुशं
वामेनापि करेण पाशमुरसि न्यस्तोत्तमाङ्गस्रजा ।
व्यामुक्तोरुकचा करालवदना वह्निप्रभा मध्यगा
ध्येया जापविधौ नरैरिति सदा विश्वेश्वरी सिद्धये ॥६५॥

अथ पद्मिनीवशीकरणमन्त्रः ।

'ॐ कामेश्वर ! मोहय स्वाहा' इति मन्त्रः । अनेन मन्त्रेण मधुमिश्रितजातिकुसुमसहितं ताम्बूलमादित्यदिने सहस्रवारमभिमन्त्रितं पद्मिन्यै दातव्यम् । पद्मिनी वश्या भवति ॥

१ 'चामुण्डे मोहय मोहय' इति ग. ।

### अथ चित्रिणीवशकरणमन्त्रः ।

‘ ॐ पच[1] पच ॐ विहङ्गम विहङ्गम ॐ कामदेवाय स्वाहा ’ इति मन्त्रः । अनेन मन्त्रेण रम्भामूलजलभावितजातीफलमिलितताम्बूलमादित्यदिने पञ्चशतवारमभिमन्त्रितं चित्रिण्यै दातव्यम् । चित्रिणी वश्या भवति ॥

### अथ शङ्खिनीवशीकरणमन्त्रः ।

‘ ॐ हर हर ॐ पच पच कामदेवाय स्वाहा ’ इति मन्त्रः । अनेन मन्त्रेण तरगमूलं श्रीफलञ्चादित्यवारे अष्टोत्तरशतवारमभिमन्त्रितं शङ्खिन्यै दातव्यम् । सा वश्या भवति ॥

### अथ हस्तिनीवशीकरणमन्त्रः ।

‘ ॐ चिरि चिरि वशं कुरु कामदेवाय स्वाहा ’ इति मन्त्रः । अनेन मन्त्रेण आदित्यदिने क्षौद्राक्तौ कपोतभ्रमरपक्षौ ताम्बूलदले विन्यस्य अष्टोत्तरशतमभिमन्त्रितं कृत्वा हस्तिन्यै देयम् । हस्तिनी वश्या भवति ॥

Indira Gandhi National
Centre for the Arts

### अथ अनिच्छाहरणोपायनिरूपणम् ।

क्षीरोदनं द्विजवराय पुरा प्रदद्यात्
पुष्योद्धृतं सितबलाचरणं कुमार्या ।
पिष्टं प्रदत्तमिति वैरकृतामनिच्छां
निःसारयेदिह मुहुर्विदितप्रभावः ॥ ६६ ॥

### अथ स्तनोत्थापनसमुद्देशः ।

मातङ्गकृष्णामयवाजिगन्धा वचायुताः पर्युषिताम्बुमिश्राः ।
हयारिपत्रीनवनीतयोगात् कुर्वन्ति पीनं कुचकुम्भयुग्मम् ॥ ६७ ॥
वसा भुजङ्गस्य हयारिपत्रं कोलस्य मेदः समभागयुक्ताः ।
वक्षोजकुम्भं मदिरायताक्ष्याः कुर्वन्ति पीनं सकलं हठेन ॥ ६८ ॥
तैलं हठाद्दाडिमकल्कसिद्धं सिद्धार्थजं लेपनतो नितान्तम् ।

---

१ ‘ ॐ पठ पठ ’ ग. ।

नारीस्तनौ चारुतरौ सुपीनौ कुर्यादसौ योगवरः सदैव ॥६९॥
श्रीपर्णिकाया रसकल्कसिद्धं तिलोद्भवं तैलवरं प्रदिष्टम् ।
प्लोतेन वक्षोजयुगे प्रदेयं प्रयाति वृद्धिं पतितोऽपि नार्याः ॥७०॥

योनिसंस्कारसमुद्देशः ।

प्रक्षालयेन्निम्बकषायनीरैर्निशाज्यकृष्णागुरुगुग्गुलूनाम् ।
धूपेन योनिं निशि धूपयित्वा नारी प्रमोदं विदधाति भर्तुः ॥७१॥
जातीप्रसूनैः सितसर्षपस्य तैलं पचेल्लघ्वनले प्रकामम् ।
अभ्यङ्गयोगेन सदैव योनौ सौभाग्यमाप्नोति रते पुरन्ध्री ॥७२॥

अथ रोमशातनसमुद्देशः ।

भुजङ्गचूर्णं कटुतैलमध्ये सप्ताहमादित्यकरे निधेयम् ।
तत्तैलयोगेन विलासिनीनां नश्यन्ति रोमाणि समूलमेव ॥७३॥
पलाशभस्मान्विततालचूर्णैं रम्भाम्बुमिश्रैरुपलिप्य भूयः ।
कन्दर्पगेहे मृगलोचनानां रोमाणि रोहन्ति कदापि नैव ॥७४॥
रम्भाजले सप्तदिनं विभाव्य भस्मेह कम्बोर्मसृणं च पश्चात् ।
तालेन युक्तं च विलेपनेन रोमाणि निर्मूलयति क्षणेन ॥ ७५ ॥

अथ पुष्पजननसमुद्देशः ।

ज्योतिष्मतीकोमलपत्रमग्नौ भृष्टं जपायाः कुसुमेन पिष्टम् ।
गृहाम्बुना पीतमिदं युवत्या करोति पुष्पं स्मरमन्दिरस्य ॥७६॥

अथ गर्भधारणसमुद्देशः ।

तुरङ्गगन्धाशृतवारिसिद्धमाजं पयः स्नानदिने निपीय ।
प्राप्नोति गर्भं नियमं चरन्ती वन्ध्याऽपि नूनं पुरुषप्रसङ्गात् ।७७।
पुष्योद्धृतं लाक्ष्मणमेव मूलं भर्त्रा निपिष्टं सघृतं च पीतम् ।
क्षीरौदनं प्राश्य पतिप्रसङ्गाद्गर्भं विधत्ते तरुणी न चित्रम् ॥७८॥
या बीजपूरद्रुममूलमेकं क्षीरेण सिद्धं हविषा विमिश्रम् ।
ऋतौ निपीय स्वपतिं प्रयाति दीर्घायुषं सा तनयं प्रसूते ॥७९॥

अथ गर्भसंस्थापनसमुद्देशः ।

कशेरुशृङ्गाटकजीवनाख्यपयोधरैरण्डशतावरीभिः ।

सिद्धं पयः शर्करया विमिश्रं संस्थापयेद्गर्भमुदीर्णशूलम् ॥ ८० ॥

अथ सुखप्रसवसमुद्देशः । अथ सुखप्रसवमन्त्रः–

ॐ इहामृतश्च सोमश्च चित्रभानुश्च भामिनि ।
उच्चैःश्रवा तुरङ्गाणां मन्दिरे निवसन्तु ते ॥ ८१ ॥
ॐ इदममृतमपां समुद्धृतं वै तव लघु गर्भमिमं विमुञ्चतु स्त्रि ।
तदनलपवनार्कवासरास्ते सह लवणाम्बुधरैर्दिशन्तु शान्तिम् ।८२।
ॐ मुक्ताः पाशा विपाशाश्च मुक्ताः सूर्येण रश्मयः ।
मुक्तः सर्वभयाद्गर्भ एह्येहि मा चिर स्वाहा ॥ ८३ ॥
एभिर्जलं च्यावनमन्त्रराजैर्जप्त्वा प्रदेयं किल गर्भवत्यै ।
सद्यः प्रसूते नवमूढगर्भा योगोऽयमात्रेयमुनिप्रदिष्टः ॥ ८४ ॥
एभिर्मन्त्रैः सप्तवारमभिमन्त्रितं जलं गर्भवत्यै पातुं दातव्यम् ।

"ॐ मन्मथ मन्मथ मन्मथवाहिनि ! लम्बोदरं मुञ्च मुञ्च लघु स्वाहा" इति मन्त्रः । अनेन मन्त्रेण सप्तवारमभिमन्त्रितं जलं गर्भवत्यै पातुं दातव्यम् । सुखात् प्रसवो भवति ॥

अथ वन्ध्याकरणसमुद्देशः ।

पलाशक्षीरिद्रुमयोः फलानि पुष्पाण्यथो शाल्मलिपादपस्य ।
मद्येन मासार्धदिनं निपीय वन्ध्या भवेन्निश्चितमेव नारी॥८५॥
फलं कदम्बस्य च माक्षिकं हि तुषोदकेन त्रिदिनं निपीय।
स्नानावसाने नियमेन चापि वन्ध्यामवश्यं कुरुते हठेन ॥ ८६ ॥
कर्षद्वयं राक्षसवृक्षबीजं सप्ताहमात्रं सितशालिवारा ।
ऋतौ निपीतं मृगशावकाक्ष्या वन्ध्यात्वमेतन्नियतं करोति ॥८७॥

अथ केशसंस्कारसमुद्देशः ।

तिलप्रसूनं सह गोक्षुरेण ससारघं गव्यघृतेन पिष्टम् ।
सप्ताहमात्रेण शिरःप्रलेपाद्भवन्ति दीर्घाः प्रचुराश्च केशाः ॥८८॥
कर्षार्धमात्रं प्रसवं फलेन निम्बस्य तैलं नियमेन पीतम् ।
क्रमेण कुन्देन्दुतुषारगौरं शिरोरुहं मेचकतामुपैति ॥ ८९ ॥

अथ इन्द्रलुप्तसमुद्देशः ।

गुञ्जाफलैः क्षौद्रयुतैर्विलिप्य केशप्रदेशे सकलेन्द्रलुप्तम् ।
अनेन योगेन सदैव केशा रोहन्ति कृष्णाः कुटिला विशालाः ९०

इति श्रीकविशेखरज्योतिरीशविरचिते पञ्चसायके तृतीयः सायकः ।

## अथ चतुर्थः सायकः ।

SANS
612.6
J40

अथ कन्यालक्षणसमुद्देशः ।

प्रख्याते महति प्रभूतविभवे चारित्रशीलान्विते
विद्याधैर्यविवेकशौर्यविभवश्लाघ्ये कुलीने कुले ।
कन्या भ्रातृयुता सुशीलविनया रूपोज्ज्वला दक्षिणा
त्रैवर्गाश्रितशुद्धवंशनिलया सद्भिर्विवाह्या नरैः ॥ १ ॥
अम्भोजास्या बहलनयना भूरिकेशप्रचारा
तुल्या स्निग्धा सुसमदशना पद्मरागाधरौष्ठी ।
रम्यश्रोत्रा मधुरवचना कम्बुकण्ठी शुभाङ्गी
मध्ये क्षीणा सुललितकरा दक्षिणावर्तनाभिः ॥ २ ॥
पीनश्रोणी कनककदलीस्तम्भजङ्घाभिरामा
रक्ताशोकप्रसवचरणा स्निग्धशाखाङ्गुलीका ।
इत्थं युक्ता सुललिततनुर्लक्षणैरुत्तमैर्या
कन्या सद्भिश्चटुलचरिता सा विवाह्या गुणज्ञैः ॥ ३ ॥

अथ कन्यादूषणसमुद्देशः ।

खर्वा पिङ्गलकुन्तला कृशतनुर्दीर्घाऽतिरोमाकुला
कृष्णा सौकरलोचना पृथुगला कृष्णाधरा दन्तुरा ।
रूक्षाङ्गी विकटस्तनी च सबला बभ्रूरवीरात्मजा
वाचाला बहुभोजना च गदिनी प्रौढा च दुःखान्विता ॥४॥
पुष्पक्ष्माधरवृक्षदेशतटिनीनक्षत्रसंज्ञा च या
हास्ये कूपयुगं कपोलयुगले यस्या भवेत् सत्वरम् ।

IGNCA RAR
ACC. No. R-323

अङ्गुष्ठाधिकपर्वणी चरणयोर्यस्याश्च जाताऽङ्गुलिः
पादस्यापि कनीनिका न पतति क्ष्मायां तदन्यैव वा ॥ ५ ॥
अज्ञातान्वयजा स्वभावपिशुना लम्बाधरा चञ्चला
कुष्ठिश्वित्रिकुलोद्भवा च वितता यस्याः कटिर्नासिका ।
निन्द्या पल्लवजिह्विका द्रुतगतिर्न्यूनाधिकाङ्गी पुन-
स्त्याज्या कामकलाकलापकुशलैः कन्या विवाहे सदा ॥ ६ ॥

अथ वरलक्षणसमुद्देशः ।

प्रख्यातोऽमलवंशजो[1] नववयाः शूरस्सुशीलश्च यः
स्वाचारः स्थिरसौहृदो गुणनिधिर्नानाकुटुम्बी बली ।
अर्थी भोगरतो विशिष्टवचनो दाक्षिण्यधैर्याश्रयो
जामाता जगतीतले[2] कविवरैरेवंविधो वर्णितः ॥ ७ ॥

अथ वरदूषणसमुद्देशः ।

पापिष्ठो व्यसनी ऋणैरुपहतो द्यूतप्रियो भिक्षुको
रोगी पुंस्त्वविवर्जितश्चलमतिर्वैदेशिकः कातरः ।
मूर्खो दुष्टकुलोद्भवश्च कृपणो वृद्धोऽतिदीनः खलः
कर्तव्यो न वरः कदाऽपि पुरुषैरेवंविधो भूतले ॥ ८ ॥

अथ विवाहभेदसमुद्देशः ।

चातुर्वर्ण्यसमाहिता मुनिवरैरष्टौ विवाहाः स्त्रियो
ब्राह्मो दैवतकस्ततो निगदितौ गान्धर्वपैशाचकौ ।
आर्षो राक्षसकस्तथाऽऽसुर इति ख्यातोऽपरश्चाष्टमः
प्राजापत्यसमाभिधः पृथगमी प्रोक्ता मया नामतः ॥ ९ ॥
आर्षो दैवतकः प्रजापतिभवो ब्राह्मो द्विजानां मतो
गान्धर्वः सह राक्षसेन कथितः क्षात्रस्य तज्ज्ञैरसौ ।
एकश्चासुरसंज्ञको निगदितो वैश्यस्य शूद्रस्य च
सङ्क्षेपादुपवर्णितं क्रमवशात्पौराणिकं लक्षणम् ॥ १० ॥

---

१ 'प्रख्यातोभयवंशजो' ग. । २ 'कथितः कुले' ग. ।

विद्यावान् गुणपूजितः सुचरितः सद्वंशजातो मुनिः
सौम्यो मानरतः सुशीलविनयो गेहागतः प्रार्थकः ।
कन्याया, गृहनायकः सपुलकस्तस्मै ददात्यादरा-
दार्षो गोयुगदक्षिणो निगदितस्तज्ज्ञैर्विवाहो वरः ॥ ११ ॥
ऋत्विग्भिः परिमण्डिते बहुविधे यज्ञोत्सवे चोत्तमे
नानावर्णसुवर्णवस्त्रकुसुमैराभूषिताङ्गी शुभा ।
कन्या दक्षिणया द्विजाय विधिना यद्दीयते चादरा-
दैवः सोऽयमुदीरितः कविवरैरित्थं विवाहो वरः ॥ १२ ॥
कन्या बान्धवसन्निधौ सुललिता विप्रोत्तमायादरा-
दुक्त्वा–तुभ्यमियं मया स्वतनया दत्तेति हर्षान्वितौ ।
धर्मं सञ्चरतां यथासुखमुभौ दाम्पत्ययोगात्सदा
प्राजापत्यकरग्रहः कविवरैरेषः प्रमाणीकृतः ॥ १३ ॥
आहूयार्चनपूर्वकं द्विजवरायाच्छाद्य वासोवरै-
र्विद्याशीलविवेकवंशविनयाचारान्विताय स्वयम् ।
कन्या प्रीतिमते वराय विधिना यद्दीयते सादरं
ब्राह्मोऽसौ मुनिपुङ्गवैर्निगदितः श्रेष्ठो विवाहोऽपरः ॥ १४ ॥
कन्या यौवनशालिनी पतिममुं या स्वीकरोति स्वयं
गान्धर्वः स हि कथ्यते, भुजबलादाकृष्यते यत्पुनः ।
ज्ञेयो राक्षस एष पण्डितवरैश्चौर्याद्विवाहोऽपरः
पैशाचः कविशेखरेण कथितस्त्याज्यः सदा यत्नतः ॥१५॥
आदाय प्रथमं वराद्बहुतरं शुल्कं यथाकाङ्क्षया
वस्त्रालङ्कृतिवैभवेन तनयासन्तोषमुत्पाद्य च ।
पश्चाद्दुष्कुलसम्भवाय मलिनं कन्याप्रदानं वृथा
प्रख्यातोऽधमवंशजापरिणयस्तज्ज्ञैरसावासुरः ॥ १६ ॥

अथ परदारत्यागसमुद्देशः ।

अश्रद्धामुपहास्यतां मलिनतामर्थक्षयं लाघवं
गर्हां ग्लानिमधोगतिं विकलतामायुःक्षतिं दुर्गतिम् ।

इत्थं ये परदारकर्मणि रता लोकत्रये निन्दिता
विन्दन्ते परमापदः सुखधिया दुःखं नरास्ते सदा ॥१७॥
पौलस्त्यः सुरदैत्यमर्त्यमुकुटव्याघृष्टपादाम्बुजो
मैथिल्याहरणादवाप मरणं वालिश्च्युतो राज्यतः ।
पाञ्चालीप्रतिकाङ्क्षितेन निधनं भीमाद्धतः कीचक-
स्तस्मादन्यवधूर्नरैर्न मनसाऽप्यालापनीया भुवि ॥ १८ ॥

अथ दूतीसमुद्देशः ।

चक्षुःप्रीतिरुदीरिता प्रथमतश्चित्तभ्रमः स्यात्ततः
सङ्कल्पस्तदनन्तरं निगदितो निद्राविनाशस्तथा ।
वैराग्यं विषयेषु कार्श्यमथ च व्रीडानिवृत्तिस्ततो
ह्युन्मादो मरणं दश(नव)प्रकटिताः कन्दर्पचेष्टा इति ॥१९॥
कामिन्या नवयौवने न मिलति स्वेच्छाविहारो नृणा-
मुन्मादो मरणं तदा मनसिजव्यामोहतो जायते ।
तस्मात्तद्विनिवारणाय पुरुषैरन्याङ्गना कामिभि-
र्गन्तव्येति वदन्ति काश्यपमुनिक्षेमेन्द्रवात्स्यायनाः ॥२०॥
तारापीडसुतो विनाशमगमत्कादम्बरीकाङ्क्षया
व्यामुक्तः किल पुण्डरीकमुनिरप्युच्चैर्महाश्वेतया ।
उर्वश्या च पुरूरवा नरपतिः सन्त्याजितो जीवितं
तस्माज्जीवितरक्षणाय हि विनिर्गम्या परप्रेयसी ॥ २१ ॥
दासी वारवधूर्नटी च विधवा बाला च धात्री तथा
कन्या प्रव्रजिता च भिक्षुवनिता सम्बन्धिनी शिल्पिनी ।
मालाकारनितम्बिनी प्रतिसखी दौत्ये स्मृता योषिता-
मालापे कविभिः सदैव मदनव्यापारलीलाविधौ ॥ २२ ॥

अथ सुखसाध्यासमुद्देशः ।

प्रौढा कान्तविमानिता बहुगुणा रम्याऽनपत्या तथा
रण्डा स्वैरपरा स्वतन्त्रगमना शिल्पप्रिया गायिका ।

---

१ 'वालिश्च तारार्थतः' ग. ।

षण्ढोन्मत्तदरिद्रसेवकमहारोगार्तडिम्भाङ्गना
नूनं सिद्ध्यति दूतिकानिगदिता रम्याभिसारोत्सवे ॥२३॥

अथ कष्टसाध्यासमुद्देशः ।

एका वल्लभरक्षिता परजनालापे विरक्ता दृढा
निःस्नेहा धनयौवने गुरुजनाद्भीता च लज्जावती ।
स्वस्था सुन्दरनायका पतिरता शिष्यादिकान्ता तथा
दुःसाध्या कविशेखरेण रमणी प्रोक्ता रतिप्रार्थने ॥ २४ ॥

अथ त्याज्यस्त्रीसमुद्देशः ।

अज्ञाता द्विजवल्लभा गुरुवधूर्मित्राङ्गना रोगिणी
चेटी प्रव्रजिता सती रिपुवधूः शिष्या च गर्भान्विता ।
भ्रूणघ्नी मृतसन्ततिः खलजना चास्पृश्यजा गोत्रजा
गन्तव्या न कदाचिदेव पुरुषैरेताः स्त्रियः कामिभिः ॥२५॥

सुरतत्याज्यस्थानसमयसमुद्देशः ।

नद्यां देवगृहे चतुष्पथवटे शैलस्य सानौ जले
गुर्वग्निद्विजसंनिधौ परगृहे दुर्गे श्मशाने वने ।
सन्ध्यायां दिवसे कदाऽपि सुरतं पुम्भिर्विवेकान्वितै-
र्दृष्ट्वा धर्मविरोधसङ्कटमिति त्याज्यं सदा यत्नतः ॥ २६ ॥
अष्टम्यां हिमरश्मिशेखरतिथौ बाणे च पूर्णातिथौ
भानोः संक्रमणे व्रते च शरदि ग्रीष्मे क्षपायामपि ।
यातायातपरिश्रमे ज्वरगदे संभोगचेष्टां नरः
कुर्यान्नैव कदाचिदेव सुकृतीत्याहुर्मुनीन्द्राः स्फुटम् ॥ २७ ॥

अथ सुरतयोग्यस्थानसमुद्देशः ।

स्फूर्जद्दीपशिखोज्ज्वले सुललिते रम्योन्नते विस्तरे
धूपोद्गारमनोहरे कुसुमस्रग्दामोपशोभान्विते ।
वीणातालरवाकुले मनसिजप्रस्तावनानन्दिते
सम्भोगः कुशलैः स्वकीयभवने कार्यो यथाकाङ्क्षया ॥२८॥

१ 'गोष्ठे' ख. । २ 'मनसिजप्रस्तावनापण्डितैः' ख. ।

अथाभिलाषसमुद्देशः ।

उक्ता गच्छति लज्जिता विरमति प्रेम्णा मनागीक्षते
केशाँल्लुञ्चति जृम्भणं रचयति प्रस्तौति गाथां मुहुः ।
आलिङ्गत्यपरां विरौति परुषं चुम्बत्यसौ बालकं
गात्रं भञ्जति जृम्भते विहसति प्रत्युत्तरं याचते ॥ २९ ॥

दोर्मूलं खलु दर्शयेत् स्तनयुगे वस्त्रं समालम्बते
अङ्गुष्ठेन लिखेन्महीं स्मितमुखी व्रीडां विधत्ते मृषा ।
दन्तेनाधरपल्लवं विदशति व्यक्तं तथा भाषते
भावैरेभिरिह स्फुटं मृगदृशां ज्ञेयोऽभिलाषः सदा ॥ ३० ॥

अथालिङ्गनसमुद्देशः ।

माल्यापूरितकुन्तलः सुवसनः स्निग्धाङ्गरागोज्ज्वलो
नानाभूषणसुन्दरः स्मरवशस्ताम्बूलपूर्णाननः ।
स्फूर्ज्जद्दीपमनोज्ञवासभवने[1] शय्यातले नायको
रागार्थं परिरम्भणं प्रथमतः कुर्यात्समं योषिता ॥ ३१ ॥

वृक्षारूढकसंज्ञकं प्रथमतस्तस्माल्लतावेष्टितं
तस्माज्जाघनविद्धकावपि मतावूरूपगूढं पुनः ।
ज्ञातव्यं तिलतण्डुलं रसविदामालिङ्गनं योषितां
क्षीरं नीरपुरःसरं निगदितं तस्माच्च लालाटिकम् ॥ ३२ ॥

एकेन पादेन पदं स्वभर्तुरन्येन चाक्रम्य तदूरुभागम् ।
आपीड्य दोर्भ्यामपि कान्तपृष्ठं वृक्षाधिरूढं प्रवदन्ति तज्ज्ञाः॥३३॥

ऊर्ध्वं भुजाभ्यां[2] सरलाङ्गयष्टी क्षोणीरुहं वल्लिरिवाऽधिरुह्य ।
नारी प्रियं चुम्बति निस्तरङ्गा भवेल्लतावेष्टितसंज्ञकं तत् ॥३४॥

श्रोणीतटे बाहुयुगेन कान्तमापीड्य मुक्ताम्बरकेशभारा ।
वक्त्रासवं स्वादयति प्रहृष्टा तज्ज्ञैः स्फुटं जाघनमेतदुक्तम् ॥३५॥

सुखोपविष्टं पुरुषं पुरन्ध्री सम्मीलिताक्षं स्वकरप्रबन्धात्[3] ।

---

१ 'स्फूर्जद्दीपमनोजसद्मनि वरे' इति पा० । २ 'भुजाभ्यामवलम्ब्य या स्त्री' ग. । ३ 'सुरतप्रसङ्गात्' ग. ।

आविध्यति प्रेमलसत्कुचाभ्यामालिङ्गनं विद्धकमेतदाहुः ॥३६॥
कान्तो मनोजव्यथिताङ्गयष्ट्या आपीडयेदूरुयुगं युवत्याः ।
ऊरूपघातेन कविप्रवीरैरूरूपगूढं तदिदं प्रदिष्टम् ॥ ३७ ॥
बाहूरुवक्षोजघनेन गाढमन्योन्यसंसक्तशरीरयष्ट्योः ।
आनन्दभावाद्यदुदीर्णभावमालिङ्गनं तत्तिलतण्डुलाख्यम् ॥३८॥
गात्रोपरिष्टादथ तल्पमध्ये संलीयते यन्मिथुनं शरीरे ।
कामातिरेकात् कृतपूर्णचेष्टमालिङ्गनं क्षीरजलं प्रदिष्टम् ॥ ३९ ॥
अन्योन्यसंसक्तमुखं च बाहू नेत्रं ललाटं हृदयं कपोलम् ।
आनन्दभावश्रममीलिताक्षं लालाटिकं तत्त्वविदो वदन्ति ॥४०॥

अथ चुम्बनसमुद्देशः ।

गण्डस्थलीमस्तकदन्तवासोग्रीवाकुचोरःस्तनचूचुकानि ।
आलिङ्गनानन्तरमेव यूनोः स्थानानि चुम्बस्य वदन्ति तज्ज्ञाः ४१
कक्षायुगं चापि नितम्बिनीनां कन्दर्पगेहं च रतिप्रवीणाः ।
चुम्बन्ति कामं तरलायताक्ष्या देशस्य सात्म्येन सदैव लाटाः ४२
कान्तोऽङ्गनाया वदने स्वकीयं वक्त्रं समारोप्य बलेन यत्र ।
न चुम्बति क्रोधवशेन नारी स्याच्चुम्बनं तन्निमिताभिधानम् ४३
पत्युर्मुखे स्वीयमुखं निवेश्य प्रेम्णा मनागश्नति दन्तवासः ।
उच्चेन गृह्णात्यपि कम्पितोष्ठी प्रोक्तं मुनीन्द्रैः स्फुरितं विनोदात् ४४
हस्तेन नेत्रं परिमील्य भर्तुः सम्मीलिताक्षी वदने स्वजिह्वाम् ।
निक्षिप्य च क्रीडति यत्र लोला ख्यातं रसज्ञैः खलु घृष्टसंज्ञम् ४५
हस्ताङ्गुलीसंपुटकेन यत्र कान्तोष्ठमादाय रसज्ञया च ।
आस्वादयेन्निर्दशनं विनोदात् स्याच्चुम्बनं पीडितमेतदेव ।४६।
कान्ताधरं स्वाधरसंपुटेन पीत्वा मुहुः स्वादयति क्रमेण ।
नारी च तेनैव विधानकेन ज्ञेयं मुनीन्द्रैरिति संपुटाख्यम् ॥४७॥
ओष्ठेन कान्तोष्ठयुगं निपीय जिह्वां निधायाप्यथ तालुभागे ।
चुम्बोत्सवे नृत्यति यत्र नारी प्रोक्तं समौष्ठं मुनिभिः पुराणैः ४८

१ 'संनीयते' ग. । २ 'आनन्दभावावनिमीलिताक्षौ' ग. ।

अथ नखाघातसमुद्देशः ।

कक्षाकुचोरःस्थलकुक्षिनाभिश्रोणीललाटाङ्घ्रिकरेषु सद्यः ।
साङ्गुष्ठसर्वाङ्गुलिकैश्च सर्वैः सुव्यक्त एषः स्तनकन्धरादौ ॥४९॥
संज्ञापकं मन्मथरागराशेरुक्तं मुनीन्द्रैश्छुरिताभिधानम् ।
वक्षोजकन्दर्पगृहाधरेषु देयं नवोढाप्रमदाजनानाम् ॥ ५० ॥
कण्डूयनेनैव शिरोरुहाणामस्योपयोगं परिकीर्तयन्ति ।
अर्धेन्दुसङ्काशमिदं नखज्ञैरर्धेन्दुसंज्ञं कथितं समासात् ॥ ५१ ॥
कक्षानितम्बस्तनपार्श्वकेषु दातव्यमेतत् करजं सदैव ।
अर्धेन्दुसंज्ञद्वितयं प्रयुक्तं स्यान्मण्डलाख्यं मदनावतंसम् ॥ ५२ ॥
ऊरूतटे कामगृहे नितम्बे प्रोचुर्मुनीन्द्रा विनियोगमस्य ।
समैश्च सर्वैर्नखरैः सुलग्नैस्तज्ज्ञैः किलोक्तं शशकप्लुताख्यम् ॥५३॥
सीमन्तपार्श्वे हृदि चूचुकादावेतत् प्रयोज्यं सुरतप्रयोगे ।
सर्वैर्नखैर्वै स्तनमध्यभागे पश्चादधोऽङ्गुष्ठभवा हि रेखा ॥ ५४ ॥
व्यक्तीकृता रागकरी तदेतन्मयूरपादं समुदीरयन्ति ।
अलम्बमेवं स्फुरिताधरेखं प्राहुः क्षतं पङ्कजपत्रसंज्ञम् ॥ ५५ ॥
दोर्मूलवक्षःस्थलनाभिसंधावस्योपयोगं वदते महेशः ।
रेखायुगं गण्डयुगे प्रदत्तं स्तनान्तकक्षाजघनस्थलेषु ।
देशान्तरं गच्छति कामिनीनां संस्मारकं दर्दुरकं वदन्ति ॥५६॥
पुंसः शरीरे युवतीकुचे वा क्षतं नखस्य प्रतिवीक्ष्य सद्यः ।
कन्दर्परागाकुलचित्तवृत्तिर्मुनेरपि स्यात् किमुतेतरस्य ॥ ५७ ॥
सर्वस्वमेवास्ति मनोभवस्य प्रेम्णा प्रयुक्तं करजं रतज्ञैः ।
नाऽस्माद्द्वितीयं भुवि रागबीजमित्याह शीतांशुकलाकिरीटः॥५८॥

अथ दशनघातसमुद्देशः ।

दन्तप्रकाराश्च नखप्रकारैर्ज्ञेयाः समा एव समैश्च सद्भिः ।
शीत्कारहुङ्कारविचेष्टिताद्याः प्रायो विशेषाः पुनरत्र कार्याः ५९

---

१ '०कुचोरुस्थल०' इति क. ।

श्लथा घनास्तीव्रमुखाः समाज्ञा रागस्पृशो निर्मलदीप्तिभाजः ।
दन्ता प्रदेया नखदानदेशे वक्त्रान्तराक्षिद्वितयं विहाय ॥ ६० ॥
दन्तौष्ठसंयोगवशेन गण्डे दन्तप्रकारः किल विद्रुमोऽयम् ।
अभ्यासयोगाद्युवतीजनानां स्यान्नान्यथा काऽपि विनोदतस्तु ६१
ऊरुस्थले कण्ठकपोलयुग्मे खण्डाभ्रकं मण्डलतुल्यरूपम् ।
संशोभते दन्तमिदं युवत्याः प्रायो मुनीन्द्राः समुदीरयन्ति॥६२॥
दीर्घा सुरक्ता क्षतकुञ्चिता च रेखा स्थले चूचुकयोः प्रदेया ।
विशेषकाले स्मरणे च तज्ज्ञैर्दन्तोऽयमुक्तः किल कोलचर्चः(र्वः)६३

अथ केशाकर्षणसमुद्देशः ।

द्वाभ्यां कराभ्यां शिरसि प्रकामं कृष्ट्वा कचांश्चुम्बति वल्लभश्चेत् ।
तदेव दिष्टं समहस्तसंज्ञं स्यादेकहस्तेन तरङ्गरङ्गः ॥ ६४ ॥
कर्णप्रदेशे च कचं निपीड्य प्रेम्णा पतिश्चुम्बति वल्लभास्यम् ।
अन्योन्यहस्तग्रहविस्तरेण कामावतंसं मुनयो वदन्ति ॥ ६५ ॥
संवेष्ट्य सर्वाङ्गुलिभिः कचौघं यस्याः पतिर्धारयति स्मरार्ताम् ।
भुजङ्गवल्ली परिकीर्तितेयं रतोत्सवे केशकलाविधिज्ञैः ॥ ६६ ॥
भव्या घना रौक्ष्यविवर्जिताश्च श्यामा विशाला बहुलाः कचाः स्युः।
चुम्बप्रदानावसरे प्रकर्ष्या रागोदयार्थं तरुणीजनानाम् ॥ ६७ ॥
इत्यादयो बाह्यरतप्रकाराः पूर्वं रतज्ञैः परिकल्पनीयाः ।
अन्येऽपि ये सन्ति बहुप्रभेदा नोक्ता मया विस्तरभीतितस्ते ६८

इति श्रीकविशेखरज्योतीश्वरविरचिते पञ्चसायके चतुर्थः सायकः ।

---

## अथ पञ्चमः सायकः ।

अथ नाडीसमुद्देशः ।

मनोभवागारमुखे तु नाड्यस्तिस्रो भवन्ति प्रमदाजनानाम् ।
समीरणा चान्द्रमसी च गौरी विशेषमासामुपवर्णयामि ॥ १ ॥

---

१ 'वल्यः' ग. ।

प्रधानभूता मदनातपत्रे समीरणा नाम विशेषनाडी ।
तस्या मुखे यत्पतितं नृवीर्यं तन्निष्फलं स्यादिति चन्द्रमौलिः ॥२॥
या चापरा चान्द्रमसी च नाडी कन्दर्पगेहे भवति प्रधाना ।
सा सुन्दरी योषितमेव सूते साध्या भवेदल्परतोत्सवेन ॥ ३ ॥
गौरीति नाडी यदुपस्थदेशे प्रधानभूता भवति स्वभावात् ।
पुत्रं प्रसूते बहुधाऽङ्गना सा कष्टोपभोग्या सुरते प्रदिष्टा ॥ ४ ॥

अथोत्तानबन्धसमुद्देशः ।

प्रसारितोरुद्वयमध्ययोगाद्गाढाऽपि नारी श्लथतामुपैति ।
संलग्नजानुद्वयबन्धयुक्ता श्लथाऽपि सं[1]कोचमलं प्रयाति ॥ ५ ॥
तस्या युवत्याः प्रकृतिं च सत्त्वं देशं च भावं मदनातपत्रम् ।
आलोक्य बन्धाः परिकल्पनीयाः सम्भोगकाले पुरुषै रसै[2]ज्ञैः ॥६॥
उत्तानसुप्तप्रमदोरुमध्ये स्थितः पतिः कामयते प्रकामम् ।
तयोर्द्वयोः प्रीतिकरः प्रदिष्टो बन्धो नराणामतिदुर्लभोऽयम् ॥७॥
उत्तानसुप्ता युवतिः स्वपादौ स्कन्धे समारोप्य रमेन्नरस्य ।
बन्धोऽयमुक्तः समपादसंज्ञः प्रयोजनीयः करिणीरते[3]षु ॥ ८ ॥
एवंविधायाः स्त्रिय एव जङ्घां कान्तः स्वजङ्घोपरि सन्निवेश्य ।
उद्भ्रम्य भूयः कटिमारमन्त्याः स्यादेष बन्धः किल नागराख्यः ।९।
धृत्वा स्वजानुं गगने स्वपादौ शय्यातले स्त्री प्रथमं प्रसुप्ता ।
कुचौ पतिः पाणि[4]युगेन धृत्वा रमेत्तदा व्योमपदाभिधानम् । १० ।
एकं युवत्याश्चरणं पृथिव्यामूर्ध्वं तथाऽन्यं परिकल्प्य कान्तः ।
पं[5]क्त्यां स्थितो हस्तयुगं च भूमौ त्रैविक्रमः स्यादिति बन्धराजः ११

नितम्बबिम्बं किल नायकेन
नार्यास्त्रिकं हस्तयुगेन धृत्वा ।

---

१ 'संकोचमुपैति नूनम्' ग. । २ 'रतिज्ञैः' इति । ग. । ३ 'तरुणी-रतेषु' इति पाठान्तरम्' । ४ 'पाणितलेन' इति ग. । ५ 'कट्यां' ग. ।

गुल्फौ निधाय स्थित एव तस्या
बन्धोऽप्यसौ चाटुककेलिकः स्यात् ॥ १२ ॥
कान्तस्य वक्षःस्थलगौ च (स्व)पादा-
वालिङ्ग्य गाढं प्रमदा कराभ्याम् ।
किञ्चिन्नतोरुद्वययोगतश्च
ज्ञेयो बुधैरित्यवदारितोऽयम् ॥ १३ ॥

अथ पार्श्वबन्धसमुद्देशः ।

एकं युवत्या हृदये स्वपादं तथाऽर्पितं तल्पगतं तदन्यम् ।
प्रौढाङ्गनावल्लभ एष बन्धः ख्यातः पृथिव्यामुपवीतिकाख्यः १४
ऊर्वोः पतिर्मध्यगतो युवत्याः पार्श्वस्थितायाः परिरभ्य देहम् ।
यूनोस्त्रिकालोलनतो रसज्ञैरत्यादृतः सम्पुटनामधेयः ॥ १५ ॥
पार्श्वस्थितायाः मृगशावकाक्ष्याः पृष्ठावलम्बी रमणः प्रसुप्तः ।
लिङ्गस्मरागारनिवेशयोगादिहोपदिष्टः खलु नागबन्धः ॥ १६ ॥

अथोपविष्टबन्धसमुद्देशः ।

पद्मासनं संपरिकल्प्य भर्ता क्रोडोपविष्टां युवतिं रमेच्च ।
अन्योन्यकण्ठार्पितबाहुयोगात् पद्मासनाख्यं प्रवदन्ति सन्तः॥१७॥
कान्तो नितम्बस्थित एव नार्याः श्रोणीं कराभ्यां यदि याति धृत्वा ।
आस्फालयेद्वाऽपि कटिप्रबन्धात् प्रोक्तो मुनीन्द्रैरिति कीर्तिबन्धः१८

अथाधोमुखबन्धसमुद्देशः ।

अधोमुखस्थां रमयेच्च नारीं [1]तत्पृष्ठवर्ती पशुतुल्यरूपः ।
भर्ता परिक्रीडति भावहीनो निर्दिश्यते हारिणबन्ध एषः ॥१९॥
दन्तावलच्छागतुरङ्गमाणां क्रीडाप्रकारैश्च भवन्ति बन्धाः ।
इत्थं रसज्ञैरनुलापनीया नोदाहृता विस्तरभीतितस्ते ॥ २० ॥

ऊर्ध्वबन्धसमुद्देशः ।

अन्योन्यदोःपञ्जरमध्यजातः स्तम्भो यदा बाहुयुगेन लग्नः ।
निष्पीड्य नारीं पतिमूर्ध्वसंस्थं रमेत्तदा [3]व्याप्तकरं वदन्ति॥२१॥

---

१ 'तत्पृष्ठवर्ती' ग. । २ 'उत्पृष्ठवर्ती' ग. । ३ 'व्यायतकं' क. ।

एको युवत्या यदि कान्तहस्ते जानुस्थितः स्यादपरः पृथिव्याम् ।
कान्तं कराभ्यामुपगूह्य यत्स्याज्ज्ञेयं रसज्ञैः करणं त्रिपादम् ॥२२॥

अथ पुरुषायितसमुद्देशः ।

अधोमुखी कान्तहृदि प्रसुप्ता दोर्भ्यां समालिङ्ग्य यदि प्रयाति ।
गा(प्रौ)ढाङ्गनावल्लभ एष तज्ज्ञैः बन्धः प्रदिष्टो विपरीतरूपः॥२३॥
धूर्त ! त्वमेवं विजितोऽस्यकस्माद्युद्धे मया पञ्चशरस्य नारी ।
इत्यादिकं भूरिविधं रटन्ती प्रायः सुखं विन्दति केलिरङ्गे॥२४॥

विपरीतरतावयोग्यां स्त्रियं दर्शयति ।

नवप्रसूता ऋतुयोगयुक्ता गर्भालसा स्थूलतनुर्नताङ्गी ।
क्षीणा नवोढा ज्वरिता च नारी वर्ज्या रतिज्ञैर्विपरीतबन्धे ॥२५॥

अथ सन्ताडितसमुद्देशः ।

वामस्वाभावान्मदनस्य रागो हस्तप्रहारात्समुपैति वृद्धिम् ।
तस्माद्यथास्थानमसौ विधेयो वराङ्गनायाः सुरतावसाने ॥२६॥
यदङ्गना कान्तहृदि प्रहारं मुष्ट्या भजन्ती सुरतोपचारैः ।
सन्ताडितं नाम वदन्ति तज्ज्ञा विस्तीर्णहस्तेन तदा पताकम् २७
साङ्गुष्ठमध्याङ्गुलसम्प्रहारात् सञ्जायते कुण्डलनामधेयः ।
यः केवलाङ्गुष्ठभवोऽभिघातः प्रोक्तः कवीन्द्रैः स तु बिन्दुमालः २८

द्रवति यदि न नारी प्रौढरागार्तियुक्ता
मृदुनिधुवनयोगे दन्तसन्धौ सलीलम् ।
पिबति दशनवासः किञ्चिदुन्मुच्य भूयः
कथितमिह रसज्ञैः सीत्कृतं रागकारि ॥ २९ ॥

पिकशिखिकलहंसप्रायपक्षिव्रजानां
ध्वनितमनुकरोतीत्यङ्गना मन्मथार्ता ।
मुखदशनविवर्तात्तत्कवीन्द्रा वदन्ति
स्तनितमिति समासाच्चित्रसम्भोगकाले ॥ ३० ॥

---

१ ‘ अल्पा प्रसूता ’ इति क. ।

एवंविधकरणस्य फलं निरूपयति ।

इत्यादियोगैः पृथुकामभावं सम्पाद्य नारीपुरुषौ चिरेण ।
जातानुरागौ रहसि प्रकामं सौख्यं समास्वादयतो महीयः ॥३१॥

अष्टनायिकासमुद्देशः ।

यस्याः पतिर्मिलति केलिकथानुरक्तः
पार्श्वं न मुञ्चति मनोभववेगयुक्तः ।
स्यात्सुन्दरी सकलसौख्यकलानिधाना
स्वाधीनपूर्वपतिकेति वदन्ति तज्ज्ञाः ॥ ३२ ॥

पुष्पाङ्गरागरुचिरा तरुणी प्रियस्य
तिष्ठत्यनागमनहेतुविचारलोला ।
एषाऽबला न हि चिरं परिदेवनीया
सोत्कण्ठितेति कथिता कविभिः पुराणैः ॥ ३३ ॥

स्रक्चन्दनाम्बरविभूषणभूषिताङ्गी
या वल्लभागमनमार्गविरूढदृष्टिः ।
तल्पं गता रुचिरवासगृहेऽवशेते
सा कीर्तिता जगति वासकसज्जितेति ॥ ३४ ॥

क्रोधात्प्रयाति चरणे पतितोऽपि कान्तः
प्रायः प्रचण्डवचनाच्चरणैर्निरस्तः ।
पश्चात्तदीयविरहक्षरदानताङ्गी
सा कीर्तितेह कलहान्तरिता कवीन्द्रैः ॥ ३५ ॥

सङ्केतकं प्रियतमः स्वयमेव दत्त्वा
नैवागतः समुचिते समये च यस्याः ।
दृष्टा वचोऽमृतरसैः सकलाङ्गयष्टिः
सा वर्णिता कविवरैरिह विप्रलब्धा ॥ ३६ ॥

प्रातर्विनिद्रवदनस्मरभारचौरो
निद्रालसोऽलसगतिर्नखविक्षताङ्गः ।

यस्याः प्रयात्यभिमुखं मुहुशो युवत्याः
सा खण्डितेति कथिता कविभिः पुराणैः ॥ ३७ ॥
आरम्भभग्नचरिता विकला च नारी
या निर्मिता हि मदनेन मदेन याति ।
गुप्ताभिसाररसिका परवेश्म गन्तुं
सा कीर्तिता कविवरैरभिसारिकेति ॥ ३८ ॥
देशान्तरं प्रतिवसद्रमणश्च यस्या
दत्त्वाऽवधिं चिरतरं गुरुकार्ययोगात् ।
दुर्वारदुःखदहनैः परिवेदिताङ्गी
सा प्रोषितप्रियतमा कथिता मुनीन्द्रैः ॥ ३९ ॥

ग्रन्थोपसंहारः ।

यावच्चन्द्रकलाकिरीटहृदये शैलाधिराजात्मजा
यावद्वक्षसि माधवस्य कमला सानन्दमादीव्यति ।
यावत्कामकलाविवर्तचटुलं क्षोणीतलं राजते
तावच्छ्रीकविशेखरस्य कृतिनः काव्यं मुदे दीव्यताम् ॥४०॥

इति कविशेखरश्रीज्योतीश्वराचार्यविरचिते पञ्चसायके पञ्चमः सायकः ।

---

समाप्तश्चायं ग्रन्थः ॥

IGNCA RAR
ACC. No. R-323

## पञ्चसायकस्य पाठसंशोधनम् ।

| पृ. | पं | अपपाठः | सुपाठः |
|---|---|---|---|
| २ | १९ | कुटीलेक्षणा | कुटिलेक्षणा |
| ३ | ३ | लज्जाविहोनानना | लज्जाविहीनानना |
| १० | २० | वङ्गीगौडी | वङ्गगौडी |
| १४ | २ | पूतकरञ्जबीजैः | पूतिकरञ्जबीजैः |
| २० | २४ | चामुण्डमन्त्रः | चामुण्डामन्त्रः |
| २२ | १६ | क्षीरोदनं | क्षीरौदनं |
| २४ | ६ | ०वासरास्ते | ०वासवास्ते |
| ३० | ७ | अङ्गुष्ठेन | ह्यङ्गुष्ठेन |
| „ | २१ | ०ऽधिरुद्य | ०ऽधिरुह्य |
| ३१ | १२ | अलिङ्गना० | आलिङ्गना० |
| „ | २६ | पुगणैः | पुराणैः |
| ३४ | २२ | नायकेन | नायकस्तु |
| ३५ | १२ | पार्श्वस्थितायाः | पार्श्वस्थिताया |
| ३६ | १२ | वामस्वाभावा० | वामस्वभावा० |

Indira Gandhi National Centre for the Arts

Indira Gandhi National
Centre for the Arts